This is a reproduction of a library book that was digitized by Google as part of an ongoing effort to preserve the information in books and make it universally accessible.

Google books

https://books.google.com

602481850Y

4.5.3.
Skanda 6

A.5.3. Skanda 6

4 D 18

Indian Institute, Oxford.

The Lucknow Sparks Library.

Presented

by

Munshi Newul Kishore.

Digitized by Google

4 D 18

Digitized by Google

Digitized by Google

मिश्रितमाहात्म्यम्॥

श्रीमहामुनि वेदव्यासविरचितम्

यदन्तर्ग्गत दधीचिनृप कुष्ठनाशनादि वहुमाहात्म्यं तदाहूतसर्वतीर्थागमनं तदस्थ्युद्भववज्रेण वृत्रवधादिकथा अतिविस्तारेण वर्णितम्

लक्ष्मणपुरे

श्रीमन्मुंशीनवलकिशोर यंत्रालयेमुद्रितम्

वैक्रमीय संवत् १६३६ मार्गशुक्ल ॥

Digitized by Google

Digitized by Google

श्रीगणेशायनमः ॥ नारायणंनमस्कृत्यनरंचैवनरोत्तमं ॥ देवींसरस्वतींव्यासंततोजयमुदीरयेत्
१ अखण्डमण्डलाकारंव्याप्तंयेनचराचरं ॥ तत्पदंदर्शितंयेनतस्मैश्रीगुरवेनमः २ अज्ञानतिमिरांध
स्यज्ञानांजनशलाकया॥ चक्षुरुन्मीलितंयेनतस्मैश्रीगुरवेनमः ३ ॥ सूतउवाच ॥ कैलासशिखरेरम्ये
नानाधातुविचित्रिते ॥ अप्सरोगणसंकीर्णेगंधर्वगणसेविते ४ महादेवंसुखासीनंपप्रच्छगिरिकन्य
का ॥ पार्वत्युवाच ॥ सर्वधर्ममहंश्रुत्वात्वत्प्रसादान्महेश्वर ॥ मिश्रितस्यचमाहात्म्यंगरिष्टंपापना
शनं ५ यंश्रुत्वासर्वपापेभ्योमुच्यंतेनात्रसंशयः ॥ विष्णुलोकंसगच्छंतिकथांश्रुत्वामहात्मनः ६ आ
श्चर्यंममदेवेशउत्पत्तिंमिश्रितस्यच ॥ माहात्म्यंचतथाब्रूहिकृपांकुरुमयिप्रभो ७॥ ईश्वरउवाच ॥
श्रृणुदेविप्रवक्ष्यामिलोकानांहितकाम्यया ॥ माहात्म्यंसर्वपापघ्नमुत्पत्तिंमिश्रितस्यच ८ त्रैलोक्ये
यानितीर्थानिसर्वेचविबुधास्तथा ॥ तानिसर्वाणिदृश्यंतेमिश्रितेश्रृणुसुंदरि ९ मिश्रितात्परमंतीर्थंन
भूतोनभविष्यति ॥ गंगायांचजलेमोक्षोवाराणस्यांजलेस्थले १० द्वारकावदरीमध्येमिश्रितेयत्र

कुत्रचित् ॥ षष्ठिवर्षसहस्त्राणिप्रयागेक्रियतेतपः ११ तत्फलंलभतेदेविमिश्रितेजलदर्शनात् ॥ त
स्योत्पत्तिंप्रवक्ष्यामिश्रृणुत्वंकमलानने १२ यंश्रुत्वासर्वपापेभ्योमुच्यन्तेनात्रसंशयः ॥ कान्यकुब्जशु
भस्थानेदधीचिरभवन्नृपः १३ धनधान्यसमायुक्तोधर्मवित्पृथिवीपतिः॥ सर्वमेतत्परित्यज्यतपसा
कृतनिश्चयः १४ वाराणस्यांतपश्चर्तुं जगामनृपसत्तमः ॥ तत्रोवासचिरंकालंनियमासक्तचेतसः
१५ माघमासेमहाशीतेदारुणेदृढनिश्चयः ॥ चकारनृपशार्दूलोत्रिकालंस्नानमादरात् १६ संध्या
जपरतस्याथध्यानावस्थितचेतसः ॥ कफादयोमहादोषास्संजातावारिसेवनात् १७ शरीरेव्याधि
भिर्ग्रस्तेमहावुद्धिस्सधार्म्मिकः ॥ तपसिदृढमतिंकृत्वाचकारस्नानमादरात् १८ वहुस्नानेकृतेदेवि
ज्वरस्तस्यवभूवह ॥ तस्यैवम्वर्त्तमानस्यरुजार्तस्यमहीपतेः १९ व्यतीयुःपञ्चमासाश्चनशांतिंप्रय
यौमुनिः ॥ अथकर्मविपाकेनदधीचेर्हिमहात्मनः २० शरीरेव्याधिभिर्ग्रस्तेकुष्टमासीन्महोत्कटम् ॥
दृष्ट्वाप्रवर्त्तितंकुष्टंमुनिःशोकपरिप्लुतः २१ चिन्तयामासधर्मात्मावहुकुष्टप्रपीडितः ॥ कायिकंवाचि

कंपापंमानसंनकृतंमया २२ कथमेतन्महाकुष्ठंजातंममशरीरके ॥ इतिचिन्तापरीतात्मादधीचिर्मुनि
सत्तमः २३ वाराणसींपुरींत्यक्तुंमनश्चक्रेरुजार्जितः ॥ एतस्मिन्नन्तरेदेवःपार्व्वतीपतिरव्ययः २४ प्रा
दुर्वभूवभूतेशोद्विजोभूत्वाग्रतःस्थितः ॥ किमर्थंभोमहाराजक्षेत्रंत्यक्तुंसमुद्यतः २५ इतिप्राहप्रसन्ना
त्मावटुरूपीमहेश्वरः २६ ॥ दधीचिरुवाच ॥ शृणुविप्रेन्द्रमद्वाक्यंतत्वतस्त्वंसमाहितः ॥ राज्यंसमृ
द्धंसंत्यज्यतपश्चर्त्तुमिहागतः २७ अत्रापिनलभेच्छर्मरुजार्त्तोव्याधिपीडितः ॥ अन्तस्त्यक्ष्यामिभूदेव
गमिष्येयत्रकुत्रचित् २८ इतिराज्ञोवचःश्रुत्वापुनःप्राहवृषध्वजः २९ ॥ ईश्वरउवाच ॥ गच्छतोभ
वतोराजन्‌ग्राहीक्षेत्रस्यजायते ॥ जातायांतीर्थनिन्दायांपापभोक्ताभवान्‌खलु ३० येनिन्दन्तिमहा
तीर्थंतथाशृण्वन्तियेजनाः ॥ तेपतन्तिमहाघोरेनिरयेपापयोनिजाः ३१ अथापित्वंमहाराजब्रवीमि
शृणुयत्नतः ॥ कर्मणाजायतेलोकंकर्मणैवविलीयते ३२ भ्रमणांकर्मणैवास्तिदुस्तरेभवसागरे ॥ पूर्व
कर्मविपाकेनसुखंवादुःखमेवच ३३ अवश्यंप्राप्नुवंत्येवस्वकर्मवशगाजनाः ॥ एवंज्ञात्वामहाराजयो

गिनोज्ञानचक्षुषः ३४ शर्मप्राप्यनमोदन्तिनशोचन्तिसमास्थिताः ॥ विदित्वैवंभवान्राजन्नक्षेत्रंत्य
क्तुमर्हसि३५ अथापिगमनेवाञ्छवर्त्ततेतवमानद ॥ इतोगच्छमहापुण्यंगंगायाश्चोत्तरेस्थितं ३६
सारस्वतंमहातीर्थंसर्वाघौघविदारणम् ॥ तीर्थमस्तिप्रमथनंमहापातकसंतते ३७ यत्रदेवास्सग
न्धर्व्वाःक्रीडन्तिसहकिन्नरैः ॥ गंगायाश्चोत्तरेभागेसरय्वादक्षिणेतुच३८यस्यदक्षिणभागेतुगोमती
नामविश्रुताः ॥ नद्यस्तिराजशार्दूलनिर्मलोदकवाहिनी ३९ तत्तीर्थंगच्छराजेन्द्रकुष्ठंतेचप्रणश्यति ॥
यस्यदर्शनमात्रेणनराःयांतिदिवौकसां ४० गतिंविमानमारुह्यदिव्यरूपधराःखलु ॥ कश्यपेनपुरा
राजन्भगवन्तंसुतमिच्छता ४१ सहधर्मिण्यदितिश्चैवदेव्यासहतयामुनिः ॥ तपश्चक्रेमहातीव्रं
तत्रराजेन्द्रसत्तमः ४२ अब्दद्वादशकंराजन्सभार्य्यःकश्यपोमुनिः ॥ पक्वपर्णजलाहारोपुनश्चानि
लभोजनः ४३ एवंतपकृतस्तस्यकश्यपस्यमहामुनेः ॥ चतुष्षष्ठिसहस्राणिवर्षाणिनृपसत्तम ४४
व्यतीयूराजशार्दूलअदित्यासहभार्य्यया ॥ पूर्णेषष्ठिसहस्रान्तेचतुर्भिरधिकेनृपः ४५ आप्रसीदत

भगवान्वरंब्रूहिवचोब्रुवन् ॥ ऊचेसमुनिशार्दूलोवरंनान्यंव्रणोह्यहं ४६ नमस्तेपुंडरीकाक्षत्वाद्दशोमे
भ्रतःसुतः ॥ इत्युक्तवत्यृषौराजन् प्रसन्नोमधुसूदनः ४७ तथास्तुमुनिशार्दूलेत्युक्त्वान्तर्दधे विभुः ॥
अथर्षिश्चादितिर्देवीजगतुर्निजमंदिरं ४८ किञ्चिद्वर्षंव्यतीतेवैअभवन्वलिदानवः ॥ मांवैह्याारा
धयामासतपसादैत्यपुंगवः ४६ प्रसन्नोहंददौतस्मैवरंतदवभीष्टितम् ॥ मत्तोवरंततोलब्ध्वावलिर्दै
त्येश्वररुतथा ५० शक्रादींश्चैवदेवांश्चजित्वाचरणमूर्द्धनि ॥ स्वयमिन्द्रोह्यभूद्राजन् वलिर्दैत्येश्वर
स्तदा ५१ अथनारायणोदेवःप्रार्थितश्चामरैश्चसः ॥ वलिंछलयितुंराजन्ज्ञात्वादत्तंपुरावरं ५२
ऋषयेमरीचिपुत्राययज्ञेतस्यगृहेप्रभुः ॥ एतादृशंप्रभावंहि तत्तीर्थस्यमुनीश्वरः ५३ यत्रनारदर्षि
श्चैव शुकश्चसनकादयः ॥ जितेंद्रियाःमहाभागाःपरांसिद्धिमुपागताः ५४ महोग्रंचमहातीर्थंसर्वा
घौघविदारणं ॥ यत्रगत्वानरोराजन्सर्वपापैःप्रमुच्यते ५५ तत्तीर्थस्यचमाहात्म्यंवक्ष्यामिशृणुयत्नतः॥
पुराकृतयुगेराजन्धर्मकृदितिविश्रुतः ५६ वभूवर्द्धिजवरःप्राज्ञोसर्वकर्मदृढव्रतः ॥ न्यवसन्नगरेरम्ये

संभलग्रामविश्रुते ५७ धनधान्यसमायुक्तःपुत्रदारैश्चशोभितः ॥ तस्यविप्रवरस्यैवसंभलग्रामवा
सिनः ५८ व्यतीयुःवहुवर्षाणिक्षणमात्रेणनरेश्वर ॥ वहुसम्पत्समायुक्तःपूर्णसर्वमनोरथः ५९ अ
थकर्मविपाकेन तस्यविप्रवरस्यच ॥ कुष्टमासीन्महातीव्रमंगानिगलितानिच ६० महाकुष्टेनतीव्रेण
पीडितोद्विजसत्तमः ॥ तत्याजनगरंरम्यं सर्वसम्पत्समाकुलं ६१ भ्रमतश्चदिशश्चापिविदिशश्चद्वि
जसत्तमः ॥ पश्यन्तीर्थानिसर्वाणि देवतायतनानिच ६२ स्ना वातेषुपुनस्स्नात्वापश्यन्सर्वांश्चदे
वताः ॥ तस्यतीव्रंमहाकुष्टंकुत्रचिन्नविनश्यति ६३ अथचिंतापरीतात्मामहाकुष्टेनपीडितः ॥ क्वग
च्छामिमहातीव्रं कुष्टमेवप्रणश्यति ६४ एतस्मिन्नंतरेराजन्नारदोदेवदर्शनः ॥ प्रादुर्वभूवतत्रैवयत्रवि
प्रवरस्स्थितः ६५ दृष्ट्वामुनीन्द्रंराजेन्द्रोदीनेनवचसासुधीः ॥ स्तुतिंचकारप्रणतःदीनानांशंविधीयतां
६६ अद्यमेसफलंजन्मअद्यमेसफलाःक्रियाः ॥ स्वेच्छयायस्यसंप्राप्तमद्भुतंतवदर्शनं ६७ इतिस्तु
त्वापुनस्स्तुत्वास्तुत्वास्तुत्वापुनःपुनः ॥ रुरोदविप्रप्रवरोमहाकुष्टेनपीडितः ६८ विप्रस्यैवंदशांदृ

श्रुत्वानारदोदेवदर्शनः ॥ शिरस्याधायस्वकरंप्रोवाचमुनिपुंगवः ६६ ॥ इतिश्रीस्कन्दपुराणेउमाम
हेश्वरसम्वादेमिश्रितमाहात्म्येप्रथमोऽध्यायः ॥ १ ॥

नारदउवाच ॥ धैर्य्यंमुद्वह विप्रत्वंमाकार्षीःमानसींव्यथां ॥ तवकुष्ठविनाशायतीर्थंशृणुवदाम्यहं
१ पुरारुद्रेणदेवेनशरभिन्नावसुन्धरा ॥ तेनबाणेनरुद्रेणयत्रानीतासुरापगाः २ नाम्नाभोगावती
ख्यातापातालकृतसंश्रयाः ॥ शरेणोत्पद्यतेयस्मात्सरश्वेतंतदाभवत् ३ गंगायाश्चोत्तरेभागेसर
स्वादक्षिणेनतु ॥ तत्रतीर्थंप्रमथनंमहापातकसंतते ४ यत्रगत्वानरोविप्रसर्वाघौघात्प्रमुच्यते ॥ पृ
थिव्यांयानितीर्थानितेषुमज्जंतियेजनाः ५ तस्माच्छतगुणंपुण्यंसरश्वेतस्यमार्जनात् ॥ अश्वमेधस
हस्राणिराजसूयशतानिच ६ यत्फलंलभतेविप्रसरश्वेतस्यतत्फलं ॥ ब्रह्महत्यादिपापानिअगम्या
गमनानिच ७ नाशयेत्तत्क्षणादेवसरश्वेतस्यदर्शनात् ॥ पापावुद्धौशिरोधस्थवर्षाणामयुतायुतं ८ त
पःकृत्वाचलभतेसरश्वेतस्यदर्शनात् ॥ वाराणस्यांनिवासेनयत्फलंकवयोविदुः ॥ तत्फलंलभतेविप्र १

सरश्वेतस्यदर्शनात् ९ प्रयागेचैवयत्पुण्यंयुगानामयुतायुतं ॥ तत्पुण्यंलभतेविप्रसरश्वेतस्यदर्शना
त् १० गंगागोदावरीरेवानदीष्वन्यासुयत्फलं ॥ तत्फलंकोटिगुणितंसरश्वेतस्यदर्शनात् ११ अ
स्थिमज्जगतंपापंयत्पापंमानसंभवेत् ॥ तत्सर्वंविलयंयांतिसरश्वेतस्यदर्शनात् १२ गृहाच्चलित
मात्रंतुतस्मिन्तीर्थेचभूसुर॥त्यजंतिसर्वपापानिनरास्तत्रनसंशयः १३ गवांलक्षेषुदत्तेषुयत्फलंकवयो
विदुः ॥ तत्फलंकोटिगुणितंसरश्वेतस्यदर्शनात् १४ दर्शनेनतुयत्पुण्यंतत्सर्वंकथितंमया॥ नाहंजाना
मिभूदेवतत्रस्नानस्यकिंफलं १५ ब्रवीमिशृणुमेवाक्यंऐश्वर्य्यंविप्रसत्तम ॥ तुलाविधानंसंग्राह्यस
हसर्वामरैश्शुभैः १६ पुष्करादयानितीर्थानिगंगाद्यास्सरितस्तथा ॥ एकत्रयज्ञसहितंएकत्रतीर्थदर्श
नं १७ तोलितंचसुवर्णेनयवमेकंगुरुस्थितं ॥ तत्तीर्थंगच्छविप्रत्वंकुष्ठंतेचप्रणश्यति १८ ॥ धर्म
कृदुवाच ॥ कथंरुद्रेणदेवेनशरेणोत्पाटितामही ॥ पुनश्चदेवदेवेनकथमानीतासुरापगाः १९ एतन्मे
सर्वमाख्यानंब्रूहिविस्तरतोमुने ॥ नारदउवाच ॥ शृणुविप्रप्रवक्ष्यामिगुह्यांमोक्षफलप्रदां २० सर

Digitized by Google

श्वेतस्यतीर्थस्यचोत्पत्तिंसर्वकामदां ॥ यथारुद्रेणदेवेनशरभिन्नावसुन्धरा २१ तत्सर्वंहिप्रवक्ष्यामि
सावधानमनाःशृणु ॥ कृतेवसानेसंप्राप्तेदैत्योभूत्त्रिपुरासुरः २२ सुरज्येष्ठाद्वरंलब्ध्वावशंचक्रेचराचरा
न् ॥ इन्द्रंयमंकुवेरंचवरुणंचमहासुराः २३ जित्वामहारणेविप्र वलवान्नसुरेश्वरः ॥ तेषांहिरत्नमु
ख्यानि विविधानिमहांतिच २४ स्वयंप्रगृह्यवुभुजेश्रियंचोत्तमधारिणीं ॥ ऐरावतमिभेन्द्रंचहयंचोच्चैः
श्रवाक्षयं २५ कामधेनुंदेवगावंपारिजातंतथातरुं ॥ अन्यानिचैवरत्नानि लब्ध्वाह्यसुरसत्तमः २६
अमरावत्यांदेवपुर्य्यांराज्यंचक्रेमहासुरः ॥ स्वर्गच्युतास्तदादेवाश्शक्राद्यैःसर्वलोकपैः २७ चह्मणांश
रणंजग्मुःपद्मोद्भूतंपितामहं ॥ प्रणेमुःशिरसादेवंपद्मस्योपरिसंस्थितं २८ सर्वान्देवान्सदादृष्ट्वा
भयकम्पितकंधरान् ॥ संवोधयन्स्ववचसाप्रत्युवाचपितामहः २९ किमर्थंसकलाःदेवाःभयकम्पि
तकंधराः ॥ कथ्यतांस्वस्यवृत्तान्तंतस्यक्षेमंददाम्यहं ३० ॥ देवाऊचुः ॥ असुरोभूत्त्रिपुरोनाम्नासर्व
लोकभयंकरः ॥ निर्जितास्तेनदैत्येन बलगर्वेणपद्मज ३१ दैत्येंद्रस्यविनाशाय कुरुयत्नंपितामह ॥

वयंतेशरणींप्राप्तास्तेनकंपितमानसाः ३२ इतिश्रुत्वावचस्तेषां पद्मयोनिःपितामहः ॥ निर्ज्जरैःसकलैस्साकंकैलासंप्रत्यपद्यत ३३ तत्रदृष्ट्वामहादेवंपार्वत्यासहसंस्थितं ॥ अग्रेनंदिनंवृषभंगर्जमानंमुनःपुनः ३४ ननामसदेवदेवैस्तुब्रह्मासहपितामहः ॥ त्रिपुरासुरस्यवृत्तांतमूचवान्कमलासनः ३५ वलगर्वेणदैत्येननिर्जिताःदेवपुंगवाः ॥ यथानिहन्येत्त्रिपुरोतथाकुरुभवान्प्रभो ३६ एवंविधंवचश्श्रुत्वाब्रह्मणश्शंकरःस्वयं ॥ मेघगंभीरयावाचाप्रत्युवाचमहेश्वरः ३७ ॥ महादेवउवाच ॥ जानामित्रिपुरंदैत्यंसर्वलोकक्षयंकरं ॥ हनिष्योअसुरोदेवहनिष्येनात्रसंशयः ३८ इत्युक्तानंदिवृषभमारुह्यशंकरःस्वयं ॥ ब्रह्मेंद्रमुख्यैरमरैर्दैत्यंजेतुंसमुद्यतः ३९ ॥ इतिश्रीस्कन्दपुराणेउमामहेश्वरसंवादेमिश्रितमाहात्म्येद्वितीयोऽध्यायः ॥ २ ॥

नारदउवाच ॥ शृणुविप्रमहाभागरुद्रत्रिपुरयोर्महत् ॥ युद्धंचैवप्रवक्ष्यामिमुनिविस्मयकारकं १ श्रुत्वादैत्यमुखादेवंवृत्तान्तंत्रिपुरासुरः ॥ रुरोधत्रिपुरोदैत्योकैलासंपर्वतोत्तमं २ कात्ययैःकोटिभिःसाकं

बलैश्चार्वुदसंज्ञकैः ॥ दैत्यानामग्रणीर्विप्रजगर्जचपुनःपुनः ३ आगतंचवलंदृष्ट्वादैत्यस्यैवंमहेश्वरः ॥
ब्रह्मेंद्रमुख्यैर्दिविजैर्दैत्यंहंतुंसमुद्यतः ४ त्रिपुरस्यबलंसर्वंकोटिकोटियुतैर्युतं ॥ नाशयामाससर्वंरुद्रोय
थावह्निस्तृणाचयं ५ निहतंस्वबलंदृष्ट्वात्रिपुरोदैत्यपुंगवः ॥ निःपपातस्वयंचापिसपक्षइवभूधरः६
असुरेंद्रंनिपतितंदृष्ट्वारुद्रःप्रतापवान् ॥ चापंपिनाकनामानंप्रगृह्याकृष्यकर्णयोः ७ ववर्षबाणपूगानि
दैत्येन्द्रस्योपरिद्विज ॥ असुरेन्द्रोपिसंक्रुद्धो प्रगृह्यमहतींगदां ८ जघानमस्तकेरुद्रंमुहुर्नादंचकार
ह ॥ बलवंतमसुरंदृष्ट्वारुद्रःशूलपिनाकधृक् ९ क्रोधेनताम्रनयनोशूलंतस्यमुमोचह ॥ रुद्रेणप्रेरितं
शूलंदृष्ट्वादैत्येंद्रपुंगवः १० कृत्वांतर्हितमात्मानंमायावीह्यसुरेश्वरः ॥ दृष्ट्वामायाबलंरुद्रोस्वास्त्रंच
निष्फलंगतं ११ नापश्यदसुरंचापिक्रोधेनताम्रलोचनः ॥ जगर्जचस्वयंरुद्रोनादेनपूरयन्दिशः १२
असुरेंद्रोपिबाणेनापिरुद्रस्यपुरतस्स्थितः ॥ ववर्षबाणपूगानि शिवंबाणैःसमाकिरत् १३ दैत्येंद्रप्रे
रितान्बाणान्चक्रतेश्चरुगोरुहः ॥ मुमोचदारुणंचास्त्रमग्निनामानमद्भुतं १४ बहून्यस्त्रंचतदादृष्ट्वादै

त्यानामग्रणीर्वली ॥ मुमोचवारिदंचास्त्रमग्निशांतिंनिमित्तवित् १५ रणेचाद्भुतकर्माणंदैत्येंद्रंपश्य
शंकरः ॥ मुमोचदारुणंचास्त्रंवायुसंज्ञकमद्भुतं १६ दृष्ट्वाचदारुणंचास्त्रंदैत्येन्द्रोवलवान्पुनः ॥ ननाा
दगर्वसंभूतोश्रावणोजलदोयथा १७ तस्यदुष्टस्यनादेनचकंपेवसुधातलं ॥ शेषश्चसर्वनागेशोमुहुःकं
पमवापह १८ नादंकृत्वामहाघोरंमुमुचेस्त्रंभयंकरं ॥ पर्वतास्त्रंमहातीव्रंप्रलयाकारसन्निभं १९ रुद्र
स्यैवमहावाणांदैत्येन्द्रस्यतथापुनः ॥ युयुधातेमहाक्रुद्धौप्रलयाकारसन्निभौ २० दृष्ट्वामहावलंदैत्यं
रुद्रःक्रोधंवमन्निव ॥ मायावलंसमुत्सृज्य दैत्यंहंतुंसमुद्यतः २१ दृष्ट्वामायावलंदैत्योस्वयंमायां
विचक्रमे ॥ रुद्रमायावलंचापिदैत्येन्द्रस्यतथापिच २२ योद्धमन्योन्यमारब्धौविश्वसंहारकारकौ ॥
असुरंहिमहावीर्यंपश्यनादिकिरुद्रहः २३ चापंधुन्वन्महाघोरं शब्दमापूरितंजगत् ॥ गदामादायम
हतीं कठोरांवज्रसन्निभां २४ निजघानभ्रुवोर्मध्ये सोपिरक्तंसमुत्सृजन् ॥ निःपपातमहीपृष्ठेमूर्च्छि
तोगतचेतनः२५क्षणंविश्रम्यदैत्येन्द्रोमायांकर्तुं समुद्यतः ॥ क्वचिद्भूमौक्वचिद्व्योम्निपातालेचक्वचि १२

Digitized by Google

स्थितः २६ कदाचिज्जलमध्येचदृष्टवापर्वतमस्तके ॥ मुमोहशंकरंदैत्योमहामायासमाश्रितः २७
कदाचिदपिपूर्वायांपश्चिमायांकदाचनः ॥ कचिद्दिशियाम्यायामुत्तरस्यांकदाचनः २८ दृष्टवाकदा
चिदाग्नेयांवायव्यांचकदाचनः ॥ कदाचिदपिनैरृत्यांईशान्यांचकदाचनः २९ कदाचिन्मध्यदेशेच
सौदामिन्यिवतथावभौ ॥ यतोयतोस्वरूपंवैदर्शयामासदानवः ३० वृषेणवायुवेगेनरुद्रश्चापितत
स्ततः ॥ भ्रमतश्चशिवस्यापिवर्षाणामयुतायुतं ३१ अतीतंशृणुविप्रेंद्रअसुरस्यैवविमोहतः ॥ वृष
भश्चापिश्रमितोअंगेवाष्पंविमुंचत ३२ तृषयापीडितात्मावैनहिगंतुमलंक्षमः ॥ दृष्टवानंदिनंतृषि
तंमहादेवःप्रतापवान् ३३ धनुःपिनाकमादध्यौत्रिषुलोकेषुविश्रुतं ॥ तस्मिन्नाधायविशिषंमहीभ्राणां
विदारणं ३४ श्रुतमूलंतमाकृष्यवाणंमंत्रैःप्रयोजितं ॥ विददारमहींरुद्रोवाणेनविप्रसत्तम ३५ रुद्रवा
हुच्युतंवाणंप्रविवेशरसातलं ॥ यत्रभोगावतीगंगासर्वाघौघविदारिणी ३६ तस्याधाराग्रमानीतारुद्र
तूणंसमाविशत् ३७ ॥ इतिश्रीस्कंदपुराणेउमामहेश्वरसम्वादेमिश्रितमाहात्म्येतृतीयोऽध्यायः ३ ॥

Digitized by Google

नारदउवाच ॥ रुद्रवाणेनचानीतागंगापातालसंस्थिता ॥ दृष्ट्वासर्वर्षिभिःसाकंपद्मयोनिःपिता
महः १ अखिलैःसर्वदेवैश्चआगतोद्विजसत्तमः ॥ तज्जलंमूर्ध्निचादध्यौदेवैःसहपितामहः २ अष्टाशी
तिसहस्राणिऋषयश्चोर्द्धरेतसः ॥ व्यासस्तुअंगिराश्चैवसंवर्त्तोगौतमस्तथा ३ भारद्वाजस्तथागस्त्यो
कौशिकोगर्गएवच ॥ अन्येपिचमहात्मानोमुनयश्चमहाव्रताः ४ स्तुतिंविधायतीर्थस्यस्नानंतत्रप्रचक्र
मुः ॥ ब्रह्मातैर्मुनिभिःसाकंकृत्वास्नानंप्रयत्नतः ५ तस्मिन्पितृजलंदत्वास्वर्लोकंप्रत्यपद्यत ॥ एतत्ते
कथितंविप्रमाहात्म्यंशरभेदिनः ६ यःशृणोतिनरोभक्त्यासर्वपापैःप्रमुच्यते ॥ अहमपित्वांविप्रेन्द्रती
र्थंदर्शयितुंमहत् ७ आगतोद्विजवरप्राज्ञगच्छेहंब्रह्मणःपदं ॥ त्वमपिद्विजवरप्राज्ञगच्छतीर्थंमहाद्भु
तं ८ विधायविधिवत्स्नानंकुष्ठनाशायसुव्रत ॥ इत्युक्त्वाद्विजवरंप्राज्ञोनारदोदेवदर्शनः ९ राजन्ययौ
महाबुद्धिःसुरज्येष्ठपदंशुभं ॥ धर्मकृदपिविप्रश्चश्रुत्वानारदमुखाच्छुभं १० सरश्वेतस्यमाहात्म्यंय
यौतीर्थंमहाद्भुतं ॥ तस्मिन्तीर्थेमहापुण्येकृत्वास्नानंविधानतः ११ दिव्यदेहस्ततोभूत्वाभुक्त्वाभो

गान्ननेकशः ॥ मृतेविमानमारूढोतत्तीर्थस्यप्रभावतः १२ सहस्रवैः पुत्रदारैःस्वर्गलोकमुपाययौ ॥ अ
तोत्वमपिराजेन्द्रगच्छतीर्थंमहोत्तमम् १३ नाशयित्वामहाकुष्ठंकुरुतत्रमहत्तपः ॥ एवंदधीचिमादिश्य
शंकरोवटुरूपधृक् १४ पश्यतांसर्वलोकानांतत्रैवांतरधीयत ॥ श्रुत्वैवंतीर्थमाहात्म्यंमुनिर्मतिमतांव
रः १५ ततश्चचालशनकैस्तीर्थदर्शनलालसः १६ ॥ इतिश्रीस्कन्दपुराणेउमामहेश्वरसम्वादेमिश्रि
तमाहात्म्येचतुर्थोऽध्यायः ॥ ४ ॥

ईश्वरउवाच ॥ अथाययौमुनिवरोदुहनग्रामविश्रुतं ॥ ददर्शनगरंरम्यंसज्जनैःपरिसेवितं १ प्रवि
शन्नगरेतस्मिन्प्रासादशतसंकुले ॥ विलसद्राजगमनेपताकाभिरलंकृते २ उवासवहुमासांस्तुतस्मि
न्ग्रामवरोत्तमे ॥ अविदूरसरश्वेततीर्थेजनमनोहरे ३ तस्मिन्ग्रामेमहापुण्येआभीरोन्यवसन्सदा ॥
वहुगोधनसंयुक्तःमहिषीगणसंयुतः ४ कदाचिद्घोषवृद्धस्तुचारयन्वहुगोधनं ॥ महिषीगणसंकीर्णां
सरश्वततटंययौ ५ तृषार्त्तामहिषीकाचित्कुर्वंतीजलमार्गणं ॥ दृष्ट्वाविवेशसहसातस्मिन्तीर्थजले

शुभे ६ वारिप्रवेशमात्रेणसाश्यामामहिषीसखा ॥ जाताश्वेतशरीरातुकौमुदीशशिनोयथा ७ नदे
वीनचगंधर्वीकिन्नरीनमहोरगी ॥ तस्यारूपसमाविष्टाकिंवक्ष्योवरवर्णिनि ८ शापमुक्ताततोदेवी
यानमग्रेददर्शह ॥ शिवदूतसमानीतमद्भुतंदेवदर्शनं ९ ऊचुस्तेदूतप्रवराःकन्यांचाद्भुतदर्शनां ॥ त
वन्नेतुंसमायाताशिवेनप्रेषिताःवयं १० तेषांतद्वचनंश्रुत्वायानंचैवारुरोहसा ॥ गंधर्वगीतंशृण्वन्तीदे
वीकैलासमाययौ ११ ॥ पार्वत्युवाच ॥ काचसामहिषीदेवकिमर्थंशापभागिनी ॥ एतन्मेसंशयंनाथछे
त्तुमर्हसिशंकर १२ ॥ ईश्वरउवाच ॥ शृणुदेवीपुरावृत्तमद्भुतंचवदाम्यहं ॥ यंश्रुत्वाहर्षसंयुक्तासर्वा
नंदंप्रयास्यसि १३ वभूवचित्ररथोनामगन्धर्वोऋषिमानदः ॥ तस्यभार्य्यामहारूपापद्माक्षीइतिवि
श्रुता १४ दंपतीतौमहारूपौमहाप्रीत्याचसंयुतौ ॥ इंद्रस्योपवनेरम्येरममाणावुभावपि १५ एकदा
तौचदेवेशियानमारुह्यचित्तगं ॥ ययतुस्तुततस्तौतुदिशश्चैवावलोकितुं १६ विमानेनचदिव्येनगम्य
मानौविहायसा ॥ पश्यन्नानाविधान्देशान्नानाकारैश्चशोभितान् १७ सर्वान्देशान्ततोदृष्ट्वास्वगृहं १६

गन्तुमिच्छती ॥ साचदेवेशिपद्माक्षीसवगंधर्वसत्तमः १८ एतस्मिन्नंतरेदेविपद्माक्षीचलदर्पिवी ॥
ऋष्यशृंगंददर्शाथशृंगमेकंचधारिणं १९ प्रियंचऊचवान्तन्वीपश्यत्वद्रिंमहाद्भुतं ॥ अयंहिमानु
षाकारोशृंगमेकंविभातिच २० अहंदक्ष्येमहाभागपरंकौतूहलंमम ॥ इतितस्याःवचःश्रुत्वापतिना
वहुवर्जिता २१ अयंवैऋष्यप्रवरोशृंगीऋषिरितिस्मृतः ॥ नमस्कुरुऋषिशार्दूलंगच्छसुंदरिस्वकंगृ
हं २२ पतिनावर्जितातन्वीउपहासमकारयत् ॥ विभर्षिमनुजाकारंकिमर्थंशृंगधारणम् २३ स्वो
पहासंततोज्ञात्वाऋषिःक्रोधवमन्निव ॥ ददौशापंमहाघोरंद्वौशृंगौतेभविष्यतः २४ महिषोभवमहा
रण्येस्वेच्छयातृणचारिणी ॥ इतिशापंऋषेःश्रुत्वाकम्पमानामुहुर्मुहुः २५ वद्धांजलिपुटोभूत्वाप्रणना
मपुनःपुनः ॥ क्षमस्वभोपराधंवैनाहंवेद्मितवप्रभो २६ शापस्योद्धरणंब्रूहियेनमोक्ष्यामिचाशुवै ॥ दी
नायाःवचनंश्रुत्वाऋषिःपरमधार्मिकः २७ तस्याश्चोद्धरणार्थायउपायंप्राहमद्भुतं ॥ गंगायाश्चो
त्तरेभागेसरय्वादक्षिणेनतु २८ तत्रक्षेत्रंमहापुण्यंसरश्वेतेतिनामकं ॥ तत्रस्नानंयदाकार्षीस्तवशापं

विमुच्यति २९ एवंकथितवृत्तांतंश्रुत्वागंधर्वभामिनी ॥ सर्वेषांपश्यतांदेविमहिषीभूतावरानने ३०
साचमहिषीमहःदेविवनांतेतृणचारिणी ॥ऋषिवाक्यानुसारेणआगतानैमिषंवनं ३१ अभीरेणचसा
महिषीदृष्ट्वाप्यारण्यमध्यतः ॥ कृष्णातुरस्थलसर्वाङ्गीनीतासहिषीस्वकंगृहं ३२ यदास्नातासरश्वे
तेतीर्थंजनमनोहरे ॥ शापमुक्तातत्तोदेवीआगताममसन्निधौ ३३ एतत्तेकथितंदेवितीर्थमाहात्म्यमुत्त
मं ॥ यःशृणोतिश्रद्धयामर्त्यःब्रह्मभूतोदिवंव्रजेत् ॥ ३४ ॥ इतिश्रीस्कन्दपुराणेउमामहेश्वरसंवादेमि
श्रितमाहात्म्येपंचमोऽध्यायः ॥ ५ ॥

ईश्वरउवाच ॥ दृष्ट्वातांमहिषींदेवि पूर्णचन्द्रसमाननां ॥ विमानेवैसमारुह्यांप्रयांतींप्रियदर्श
नां १ कुष्टेनपीडितोभीरोवहुविस्मितमानसः ॥ प्रविवेशस्वयंचापिवहुकुष्टप्रपीडितः २ प्रविष्टमा
त्रोसरश्वेतेसर्वावयवसुन्दरः ॥ दिव्यरूपधरोजातःपूर्णचन्द्रसमाननः ३ पुनरावृत्यगोपालःसायंगो
महिषीयुतः ॥ शशंससर्वलोकेभ्योतत्तीर्थस्यविचेष्टितं ४ श्रुत्वापौरजनाःसर्वेतत्तीर्थस्यविचेष्टितं ॥ १८

Digitized by Google

परंविस्मयमापन्नाःप्रत्यूचुःसाधुसाध्विति ५ अहोसुमहदाश्चर्यंदृष्ट्वामध्यश्रुतंचमः ॥ यःसर्वरोगयु
क्तात्मागोपःसाध्वीसमन्वितः ६ इत्येवंसर्वतःपौराःशशंसुस्तेपरस्परं ॥ अभीरंवैपुरस्कृत्यजग्मुस्ते
राजसन्निधौ ७ अभीरेणैववृत्तांतंकथयामासुरुत्तमं ॥ अभीरउवाच ॥ शृणुराजन्वचःसम्यक्महाती
र्थमनूपमं ८ सार्द्धयोजनमस्तीहसर्वकुष्टप्रणाशनं ॥ कुष्टेनपीडितोहंवैकृत्वास्नानंसरोवरे ९ जातो
द्भुतशरीरस्तुपश्यराजन्वपुर्मम ॥ पुनरन्यच्छृणुवृत्तांतंमहिष्याश्चर्यविचेष्टितं १० ममह्येकातुमहिषी
तृषितातत्रगतापुनः ॥ पीत्वाजलंलुठित्वाचकन्याभूत्वाततस्तुसा ११ विमानेनचदिव्येनकैलास
गतिमाययौ ॥ श्रुत्वाभीरमुखादेवंवृत्तांतंराजसत्तमः १२ हर्षेणापूरितात्मावैस्मरन्वाक्यंचशूलिनः ॥
आजगामसरस्तीरंवहुसाक्षिसमन्वितं १३ दृष्ट्वासरोवरंदिव्यसरश्वेतमितिस्मृतं ॥ चकारविधिव
त्स्नानंराजामतिमतांवरः १४ राजंश्चैवमहाकुष्टंवाराणस्यांतुयद्भव ॥ सरश्वेतेकृतेस्नानेतत्क्षणांना
शमाययौ १५ दधीचिर्मुनिशार्दूलोदिव्यदेहधरःकिल ॥ सरश्वततटेरम्येतपश्चोग्रंचकारह १६ तपत्त १६

Digitized by Google

स्तस्यराजर्षेर्वर्षाणामयुतायुतं॥ व्यतीतंशृणुदेवेशिब्रह्मणश्चासनंचलं१७ मनसिज्ञातवान्ब्रह्मादधी
चिंतपसानिधिं ॥ तस्यतपःप्रभावेनग्रासनचलितंमम१८ व्यासश्चांगिराश्चैवसंवर्त्तोगौतमस्तथा॥
भारद्वाजस्तथागस्त्योकौशिकोगर्गएवच १९ एतेचैवमहासिद्धाःज्ञातवंतमहातपाः॥ राजर्षेर्हिदधीचे
श्चप्रत्यूचुश्चपरस्परं २० एतद्धिचित्रमघनाशविनाशहेतुमाख्यानकंमुनिवरस्यसमाहितात्मा॥ यः
श्रावयेत्प्रतिदिनंशृणुयाच्चभक्त्यासत्पुत्रपौत्रधनधान्यमवाप्नुयाद्धि॥ २१ ॥ इतिश्रीस्कन्दपुराणेउमा
महेश्वरसम्वादेमिश्रितमाहात्म्येषष्ठोऽध्यायः॥ ६ ॥

सूतउवाच ॥ शृण्वंतुऋषयःसर्वेयेचवैसुसमास्थिताः॥ व्यासंसत्यवतीसूनुंनत्वावक्ष्येहिमुक्तिदं
१ मिश्रितस्यैवमाहात्म्यंसर्वपापप्रणाशनं॥ जगद्धात्र्याचपार्वत्यासंपृष्टोजगदीश्वरः २ ऊचवांश्चय
थारुद्रोसर्वेषांमुक्तिदायकं॥ तथाहंसंप्रवक्ष्यामिशृश्चाग्रेमुनिसत्तमाः ३ एतावद्वदितंश्रुत्वामहादेव
स्यपार्वती ॥ पुनःपप्रच्छगिरिजाउत्पत्तिंमिश्रितस्यच ४॥ पार्वत्युवाच॥ श्रुतमेतज्जगन्नाथपवित्रं

पापनाशनं ॥ आख्यानंमुनिराजस्यवदधोचेर्हिमहात्मनः ५ अथाहंश्रोतुमिच्छामिवत्तोहंजगदीश्वर ॥
मिश्रितस्यसमुत्पत्तिंब्रूहिविस्तरतःप्रभो ६ ॥ ईश्वरउवाच ॥ धन्यासिकृतकृत्यासिवचनानन्दवर्षि
णी ॥ त्वयातुपरिपृष्टाहंजगद्धितकरंपरं ७ शृणुदेविप्रवक्ष्यामिलोकानांहितकाम्यया ॥ मिश्रितस्य
समुत्पत्तिंविस्तराच्छृणुपार्वति ८ सर्वतीर्थाधिराजेन्द्रंमिश्रितवैप्रकीर्तितं ॥ तस्यमाहात्म्यमतुलंको
नुवक्तुमलंक्षमः ९ मिश्रितंहिपरंतीर्थंमिश्रितंहिपरंतपः ॥ मिश्रितंहिपरंजाप्यंमिश्रितंहिपरंव्रत १०
पुण्यात्पुण्यतमंज्ञेयंतीर्थानामुत्तमोत्तमं ॥ एतदेवपरंज्ञानंएतदेवपरंतपः ११ एतदेवपरंब्रह्मएतदेवपरं
व्रतः ॥ मिश्रितेचपरंमोक्षंक्षेत्रंनैवास्तितादृशं १२ दत्तंभुक्तंहुतंचेष्टंतपस्तप्तंकृतंचयत् ॥ ध्यानमध्यय
नंचैवमिश्रितेसर्वमक्षयं १३ हरिर्यथाहिदेवानांद्विपदानांब्राह्मणोयथा ॥ कपिलासर्वधेनूनांमौष
धीनांयथापयः १४ एकादशीतिथीनांचआश्रमाणांयथायतिः ॥ वेदानांचयथासाम नक्षत्राणांयथाश
शिः १५ प्रणवश्चैववेदानांग्रहाणांभानुरेवच ॥ तथासर्वेषुतीर्थेषुमिश्रितंतीर्थमुच्यते १६ तस्योत्प

त्तिंप्रवक्ष्यामिशृणुत्वंकमलानने ॥सावधानमनःकृत्वाशृणुसुंदरिमद्वचः १७ पुरावृत्रासुरोनामदैत्य
श्चैवबभूवह ॥ कोटिकोटिसहस्रैस्तुआत्मतुल्यैर्महासुरैः १८ वृतोवृत्रासुरोदैत्यस्त्रैलोक्यंजेतुमुद्यमे॥
मुखंविदार्यदैत्येंद्रोत्वधरोष्ठंनिधायभूवां १९ उत्तरोष्ठंचआकाशेदेवेंद्रंजेतुमुद्यतः ॥ असंख्यैर्देवगणै
श्चैववृतोदेविपुरंदरः २० युयुधेवृत्रासुरेणैवदैत्येनदेवताधिपः ॥ वृत्रासुरप्रेरितान्येवशस्त्राण्यस्त्राणि
सुंदरि २१ लीलयैवप्रचिच्छेदशक्रोभीमपराक्रमः ॥ तथावृत्रासुरोदेविशस्त्राण्यस्त्राण्यनेकशः २२
शक्रेणप्रेरितान्येवप्रचिच्छेदमहासुरः ॥ अथान्येतत्रायुतशोरथनागहयैर्वृताः २३ देवदैत्याश्चदेवेशि
खड्गैःपरशुपट्टिशैः ॥ तोमरैर्भिन्दिपालैश्चशक्तिभिर्मुशलैस्तथा २४ महीध्रैश्चमहातुंगैरन्यैश्चविवि
धायुधैः ॥ युयुधुश्चमहादेविस्वंस्वंचजयमिच्छताः २५ युद्धेतस्मिन्महाघोरे देवदैत्यक्षयंकरे ॥ क्षो
भिताःसकलाःलोकाःसमुद्राश्चप्रकम्पिताः २६ चचालचमहीसर्वाभूधराश्चप्रकम्पिताः ॥ स्वर्गेमर्त्ये
चपाताल्लेएकाकारंप्रवर्त्तते २७ नदृश्यतेतदासूर्योचंद्रश्चापिनदृश्यते ॥ केचिच्चशक्तिभिश्चैवतथाकेचि

च्चमुद्गरैः २८ युयुधुर्देवासुराःदेविस्त्रिशूलैःपाशकैस्तथा ॥ केचिच्चतत्रायुतशोदेवदैत्याश्चसुन्दरि २९
गदाभिर्निहताश्चेवंवमुश्चरुधिरंमुहुः ॥ केचिन्निपतिताभूमौमहाशूलैर्विदारिताः ३० केषांच्चिद्बाहवः
छिन्नाःकंधरैरहितापरे ॥ शिरांसिपतुरन्येषामन्येमध्येविदारिताः ३१ जंघाभिरहिताःकेचित्पतिताः
पुनरुत्थिताः ॥ एकवाहुस्तथानेत्रौकर्णश्चैवतथांघ्रिपात् ३२ खण्डीकृतामहादेवि तस्मिन्युद्धेचकेच
नः ॥ शिरसित्रभिन्नाकेचिच्चउत्थिताश्चमुहुर्मुहुः ३३ कवन्धाश्चैवयुतशोगृहीतपरमायुधाः ॥ युयुधु
स्तत्रविशालाक्षितिष्ठतिष्ठेतिचाब्रुवन् ३४ पातितैरथनागाश्वैस्तथादेवासुरैश्चहि ॥ अगम्यावसुधा
जाताशोणितौघपरिप्लुता ३५ रक्तौघानांप्रवाहिन्योनद्यस्तत्रसहस्रशः ॥ विस्तुस्तुवुश्चदेवेशियत्राभू
च्चमहारणः ३६ ईदृग्विधंमहायुद्धंदेवैश्चअसुरैस्तथा ॥ पूर्णंदिव्यशतंदेविवत्सराणांवभूवह ३७ पू
र्णेदिव्यशतेजातेवत्सराणांचसुन्दरि ॥ मह्नावलैश्चदैत्यैश्चदेवाश्चनिष्कासिताः ३८ जिताश्चसक
लाःदेवाःदैत्यराजैर्महावलैः॥ असुरार्त्ताःसुराःसर्वेविचरंतिमहीतले ३९ यथामर्त्याश्चदेवेशितत्रासुरप्र

पीडिताः ॥ वृत्रासुरोमहाराजःसर्वदैत्येषुपुंगवः ४० आदित्यांश्चवसूंश्चैववह्निंवायुंतथैवच ॥ अ
न्यान्वैदेवमुख्यांश्चववन्धुर्निगडैर्गृहे ४१ अमरावत्यांदेवपुर्य्यांराज्यंचक्रेमहासुरः ॥ तदापराजिताः
देवाःवृत्रासुरनिपातिताः ४२ ब्रह्माणंशरणंजग्मुःपद्मयोनिंपितामहं ॥ ददृशुस्तेसुरास्सर्वेपद्मयोनिं
जगद्गुरुं ४३ कृष्णाजिनपरीधानं श्रीमंतंतेजसोज्वलं ॥ ब्रह्मर्षिभिःसमायुक्तंकमण्डलुजटाधरं ४४
प्रकाशितंदिशोभासाररराजेन्दुमिवोडुभिः ॥ दृष्ट्वाजगद्गुरुंचैवब्रह्माणंतेदिवौकसः ४५ दण्डवत्पतिता
भूमौस्तोतुमारेभिरेहितं ॥ नमस्तेदेवदेवेशनमस्तेभूतभावन ४६ नमोब्रह्मण्यदेवायदेवानांशंविधा
यिने ॥ नमःपङ्कजनाभायनमस्तेपद्मयोनये ४७ नमःपङ्कजनेत्रायनमस्तेपङ्कजांघ्रये ॥ त्वंमातात्वंपि
ताधातात्वमातापितामहः ४८ विसृष्टिस्त्वंचसर्वस्यस्थितिरूपश्चपालने ॥ नमस्तेविष्णुरूपायरुद्र
रूपायतेनमः ४९ जगद्वंद्यजगद्भर्त्रेजगद्व्यापकशाश्वत ॥ भगवन्देहिशरणमस्मभ्यंकमलासन
५० दैत्यानांचक्षयम्पश्यत्त्वमस्माकमम्बुज ॥ वृत्रासुरइतिख्यातोसर्वदैत्वजनेश्वरः ५१ सूर्यस्यैव

Digitized by Google

रम्येदृष्ट्वातत्रपितामहं ५ कृष्णाजिनपरीधानंकमण्डलुजटाधरं ॥ प्रणेमुःशिरसादेवंब्रह्माणंऋषय
श्चहि ६ कलेश्चभयसंत्रस्ताअथोचुश्चपितामहं ॥ व्यासउवाच ॥ वयंवेदान्परित्यज्यअग्निहोत्र
फलाःक्रियाः ॥ यज्ञकर्मपरित्यज्यतीर्थयात्राफलानिच ७ कलेश्चभयसंत्रस्ताप्रच्छामोजगतांप्रभो ॥
कस्मिंस्थानेतपःकार्यंकस्मिंस्थानेजपस्तथा ८ कस्मिंश्चस्थीयतेब्रह्मन्नग्निहोत्रादिर्कक्वचित् ॥ एत
देवसमाख्याहियथावदनुपूर्वसि ६ व्यासस्यवचनंश्रुत्वाब्रह्मावचनमब्रवीत् ॥ ब्रह्मोवाच ॥ साधुसाधु
महाप्राज्ञयन्मांत्वंपरिपृच्छसि १० अथध्यात्वांतरेणात्रपद्मयोनिःपितामहः ॥ संसारपरमंचक्रंब्रह्म
चक्रमितिश्रुतं ११ तत्तस्यक्षणमात्रेणपुरस्तस्थौजगद्गुरोः ॥ कृतांजलिपुटोभूत्वाब्रूहिकिङ्करवाणिते
१२ सतदागतमालोक्यब्रह्मावचनमब्रवीत् ॥ आगताःऋषयःसर्वेकलेश्चभयपीडिताः १३ तत्थानं
कथयप्राज्ञयत्रैषांविहितात्मनां ॥ स्नानंदानंजपंहोमदेवार्चनविधिक्रियाः १४ कस्मिंस्थानेहितिष्ठंति
अग्निहोत्रफलानिच ॥ येषुस्थानेषुतीर्थेषुत्वंप्रदर्शयसर्वथा १५ इत्याकर्ण्यवचस्तस्यचक्रोवचनमब्र

Digitized by Google

९६ मिश्रितस्यतटेरम्येपवित्रेपापकर्षणे ॥ स्थापयित्वामहामूर्त्तिं दधीचेश्चमहात्मनः ९७ ततोहरि
श्चदेवेशितत्रैवांतरधीयत ॥ अथब्रह्मापिसंस्तुत्वादधीचिंतेजसोज्वलं ९८ कमण्डलुधरःश्रीमान्स्व
लोकंप्रत्यपद्यत ॥ ऋषिदेवगणायेचव्यासाद्याःसनकादयः ९९ अष्टाशीतिसहस्त्राणिशौनकाद्यामह
र्षयः ॥ गतेब्रह्मणिदेवेशिस्वंस्वंलोकंययुश्चते १०० ॥ इतिश्रीस्कन्दपुराणेउमामहेश्वरसम्वादेमि
श्रितमाहात्म्येऽष्टमोऽध्यायः ॥ ८ ॥

ईश्वरउवाच ॥ इत्येतत्कथितंदेविउत्पत्तिंमिश्रितस्यच ॥ माहात्म्यंचमहादेविकिमन्यच्छ्रोतुमिच्छ
सि १ ॥ पार्वत्युवाच ॥ श्रुतंदेवअशेषेणपवित्रंपापकर्षणं ॥ मिश्रितस्यचमाहात्म्यमुत्पत्तिश्चजगद्गुरो
२ अथान्यच्छ्रोतुमिच्छामिमाहात्म्यंमिश्रितस्यच ॥ ईश्वरउवाच ॥ अथान्यच्छृणुदेवेशिमाहात्म्यंमि
श्रितस्यच ॥ व्यासश्चांगिराश्चैवसंवर्त्तोगौतमस्तथा ३ भारद्वाजस्तथागस्त्योकौशिकोभृगुरेवच ॥
अष्टाशीतिसहस्त्राणिशौनकाद्यामहर्षयः ४ प्राप्तंकलियुगंघोरंदृष्ट्वाजग्मुःपितामहं ॥ सुमेरुशिखरे ३५

लोकक्षयंकरं ८६ तेनवज्रेणदेवेशिमिजघानमहासुरं ॥ अथनारायणोदेवःस्मृत्वादत्तंपुरावरं ८७
दधीचिऋषयेदेविमूर्त्तिंस्थापितुमारभेत् ॥ स्ववपुःसदृशांचैवप्रतिमांभुजचतुष्टयां ८८ शंखचक्रगदा
पद्मैरायुधैरुपशोभितां ॥ आहूयसकलान्देवान्ब्रह्मजीवपुरोगमान् ८९ मिश्रितेपश्चिमेभागेस्था
पयामासमूर्त्तिकां ॥ ततश्चसर्वदेवान्वैप्रत्युवाचहरिःस्वयं ९० यथाहंद्वापरस्यांतेबौद्धरूपंभवाम्यहं ॥
तथेदंममस्वरूपंवैदधीचिनैवप्रतिष्ठितं ९१ दात्रकंसर्वसिद्धानांमनुष्याणांचदैवताः ॥ इत्येवंवचनंश्रु
त्वाब्रह्माद्याःऋषयस्तदा ९२दधीचिंस्तोतुमारब्धाःनतकायशिरोधराः ९३॥ ब्रह्मोवाच ॥ सुदेहकंवि
ष्णुकलाभिसुश्रियंसुजन्मकंदिनकरकोटिसुप्रभं ॥ दधीचिकंश्यामलसर्वगात्रकं चतुर्भुजंसततमनादि
नौमितं ९४ ॥ बृहस्पतिरुवाच ॥ अहश्रियंत्रिदशगणाधिसुश्रियंभवश्रियंदितभवकारणश्रियं ॥ म
हाश्रियंकलिमलमर्दनश्रियंदधीचिकंनौमितमाश्रिताश्रियं९५ ॥ ऋषयःऊचुः ॥ मनोगतिंमतिगतिव
र्जितंपरंसदद्वयंश्रुतिशिरसास्तुतंबुधैः ॥ चिदात्मकंकलिगतिकारणांतिकंदधीचिकंहृदयगतंनतावयं

Digitized by Google

वत्यःपृथिवीतले ७५ होलिकाःप्रदहंतीहमत्तीर्थेताःसमीक्ष्यतां ॥ ततोदेवीदधीचेश्चश्रुत्वायाचितवरं
शुभं ७६ तथास्त्वेनमुवाचोसौपद्मयोनिःपितामहः ७७ एवंवरंप्राप्यमहानुभावोदधीचिराजन्यकुले
वरिष्ठः ॥ ततःसमाधिंविदधारराजाप्राणस्यसोपानगतींश्चरुध्वा ७८ दग्ध्वायोगाग्निनाराजात्व
ङ्मांसरुधिरांश्चहि ॥ मेदामज्जावसाश्चासावस्थ्यावशेषशरीरकः ७९ ततोस्यप्राणःप्रविभिद्यमूर्ध्नि
पश्यन्सुदेवेष्वखिलेषुतेषु ॥ प्रकाशमानश्चदिशश्चभासाविष्णौचदेवेशिविवेशज्योतिः ८० दधीचे
श्चप्रभावंवैस्तुत्वाचविबुधर्षभाः ॥ तत्तीर्थस्यमहादेवीनामचक्रुर्महाद्भुतं ८१ यस्मात्सर्वाणितीर्था
न्यत्रसंगमितानिच ॥ अस्मिन्तीर्थेचदेवेशितत्तोनामास्यमिश्रितं ८२ अथेन्द्रस्थीनिचादायदधीचे
श्चमहात्मनः ॥ आहूयविश्वकर्माणंकारयामासवज्रकं ८३ रचितेचमहावज्रेविश्वकर्मणिपार्वति ॥
गलितानियानिभंगानिवभूवुर्मणयश्चहि ८४ विश्वकर्मामहावज्रेविश्वरूपिणिपार्वति ॥ झन्नापन्ने
तिविख्यातेकल्पयामासवज्रकं ८५ ततश्चेन्द्रोमहादेविवज्रमादायसुप्रभं ॥ वृत्रासुरेतिविख्यातंसर्वं ३३

Digitized by Google

हस्तगतैश्चैवकमण्डलुजलैस्तदा ६४ स्नापयामासराजर्षिःपूर्णायांफाल्गुणस्यसः ॥ देवदुन्दुभयो
मेदुर्वभूवुःपुष्पवृष्टयः ६५ जगुर्गंधर्वपतयोराज्ञितीर्थजलैश्नुते ॥ नन्नृतुश्चाप्सरास्तत्रपानकौतूहला
न्विताः ६६ स्नात्वात्रैलोक्यतीर्थेषुराजाधर्मभृतांवरः ॥ ततोयोगंसमाधायब्रह्मणिगतमानसः ६७
ज्ञात्वाब्रह्मगतंचित्तंदधीचेर्हिमहात्मनः ॥ प्रत्युवाचतदाब्रह्माराज्ञेतस्मैमहात्मने ६८ वरंवृणीष्वरा
जर्षेयत्त्वयामनसीप्सितं ॥ ददाम्यद्यवरंतुभ्यमन्येषामपिदुर्लभं ६९ ब्रह्मणोवचनंश्रुत्वाप्रत्युवाचद
धीचिकः ॥ दधीचिरुवाच ॥ ब्रह्मन्वरंचएतद्धिममाभिलषितंचयत् ७० पूर्णिमाफाल्गुनीचाद्ययस्यां
स्स्नानंमयाकृतं ॥ फाल्गुनेमासिपरमेष्ठिन्शुक्लप्रतिपदाहिया ७१ तदारभ्यदशम्यंतंमिश्रितंदेवदु
र्लभं ॥ तदेन्द्राद्याश्चदेवाश्चकुर्वंत्वेनंप्रदक्षिणां ७२ एकादश्यांचद्वादश्यांत्रयोदश्यांतथापिच ॥ चतु
र्दश्यांचतिथ्यांवैत्वच्छक्राद्याश्चदेवताः ७३ क्रियतांचात्रवासोवैसर्वकौतूहलान्विताः ॥ संप्राप्तायांपौ
र्णमास्यांहोलिकोत्सवसंयुतां ७४ सर्वदानसमायुक्तांक्रियतांस्नानमुत्तमं ॥ त्वत्प्रसादाज्जगद्धातर्या ३२

ज्ञयाचेंद्रोसवैर्देवगणैःसह ॥ चखानविस्तरात्कुंडंत्रिंशद्धस्तैश्चनिम्नगं ५३ तदनंतरंचदेवेशिसर्वदे
वपितामहः॥रक्षणायचतीर्थस्यस्थापयामासभैरवं ५४ कोटिलिंगानिसंसृज्यब्रह्मणापद्मयोनिजा ॥
स्थापितान्येवतत्तीर्थेसर्वतोदेवतानिवै ५५ अनंतंस्थापयामासवाराहंचतथाहरिम् ॥ स्थापयामासवै
कुंठंब्रह्मातत्रपितामहः ५६ मयावस्थापितंलिंगंदक्षिणामूर्तिनामकं ॥ तत्तीर्थपूर्वदिग्भागेब्रह्मादेवपि
तामहः ५७ स्थापयामासदेवेशंगदाधरमितिस्मृतं ॥ कल्पयित्वामहाकुंडंब्रह्मालोकपितामहः ५८
कमंडलुजलैर्दिव्यैःत्रिलोकतीर्थसंयुतैः ॥ दधीचिंस्नातुमारेभेपद्मयोनिःपितामहः ५९ दधीचिर्मुनि
शार्दूलोदृष्ट्वाकुण्डंमहोत्तमं ॥ लोकत्रयाणांतीर्थानिततोदृष्ट्वादधीचिकः ६० ब्रह्माणंवचनंचेदंप्रत्यु
वाचनराधिपः ॥ दधीचिरुवाच ॥ सत्यंसत्यंपुनःसत्यंब्रवीमिप्रपितामहः ६१ यानित्रैलोक्यतीर्थानि
आगतानिचह्यत्रवै ॥ यदाब्रूयुःस्ववचसातदास्नानंकरोम्यहं ६२ इत्येववाक्यमाकर्ण्यदधीचेश्चैव
पार्वति ॥ सर्वतीर्थानिप्रत्यूचुरहमहमितिस्मृतं ६३ शृण्वन्नखिलतीर्थानांवाक्यान्येवदधीचिकः॥ देव ३१

पोलायसुमुखायचतेनमः ४१ सुभवेषारुहासायअरुणाधरधारिणे ॥ अरुणोऽस्यायहरयेशरणायायचते
नमः ४२ श्रीवत्सांकायविभवेकिरीटिवरतेनमः ॥ युग्माभ्यांकुंडलाभ्यांचशोभमानायपद्मिने ४३ के
यूरवलयाभांतवपुषेगुरवेनमः ॥ नमोजलजसंस्थाययोगिगम्यायतेनमः ४४ तवदासोऽस्मिदासोऽस्मि
भगवन्मांपश्यसुव्रत ॥ तवांघ्रियुगसंपर्कादहसंछिन्नकिल्विषः ४५ एवंस्तुतिकरंचैवराजानंगतकल्मष
म् ॥ईक्षणेनैवसंपश्यन्प्रत्युवाचहरिस्तदा ४६ ॥श्रीभगवानुवाच ॥ राजन्वरयभद्रंतेयत्तेमनसिवांछि
तं ॥ वरंददामिराजेंद्रयत्सुरैरपिदुर्लभं ४७ ॥दधीचिरुवाच॥ नान्यंवरंवृणेदेवएतावद्धिव्रतंमम॥ यथा
त्रैलोक्यतीर्थेषुस्नानंकुर्याम्यहंशुचिः ४८ पुनस्त्यजाम्यात्मदेहंपूर्णयोगनिषेवनं ॥ तदात्वमात्ममूर्तिं
वैस्वकीयंसेनसंयुतां ४९ स्थाप्यतांदेवअत्रैवश्यामांभुजचतुष्टयां ॥ ममनाम्नैवसामूर्तिर्लोकेख्यातिं
गमिष्यतां ५० इत्येवंवाक्यमाकर्ण्यदधीचेर्हिमहात्मनः ॥ तथेतिप्रत्युवाचकृष्णःशंखचक्रगदाधरः
५१ ततोतुष्टावब्रह्माणंस्तवैर्दिव्यैर्दधीचिकः ॥ देवेंद्रंचतथास्तौषीद्राजाधर्मभृतांवरः ५२ ततोब्रह्मा ३०

Digitized by Google

स्वर्गलोकेस्यपुश्चते ॥ पुनश्चमर्त्यलोकंचपुनर्जग्मुःरसातलं ३० लोकत्रयाणांतीर्थानिसंप्राप्यविबुध
र्षभाः ॥ ततोदेविदधीचेश्चययुस्तन्महदाश्रमं ३१ दधीचेश्चाश्रमेदेवाहस्तैस्तीर्थकमंडलुम् ॥ विभि
न्नारण्यमध्येतुयोजनान्येकविंशतौ ३२ तस्थुस्तत्रविशालाक्षिसाचनेमिस्तदाभवत् ॥ तस्माद्येतद्व
नंसर्वंनैमिषारण्यमुच्यते ३३ अथागतश्चभगवान्सर्वदेवगुरुर्महान् ॥ ब्रह्माचेंद्रश्चदेवेशिऋषय
श्चोर्द्धरेतसः ३४ व्यासश्चांगिराश्चैवंसंवर्त्तोगौतमस्तथा ॥ भारद्वाजोमरीचिश्चकौशिकोभृगुरेवच
३५ अन्येपिचमहात्मानःऋषयश्चमहाव्रताः ॥ आगताश्चमहादेविनागकिन्नरगुह्यकाः ३६ दधी
चिश्चैवराजर्षिर्दृष्ट्वाविष्णुंजगद्गुरुं ॥ नतकायशिरोग्रीवोदंडवत्पतितोभुवि ३७ पुनश्चोत्थायराज
र्षिर्दर्शयन्जगतांगुरुं ॥ बद्धांजलिपुटोभूत्वाप्रत्युवाचनराधिपः ३८ ॥ दधीचिरुवाच ॥ पीतांबरधरं
देवंशंखचक्रगदाधरं ॥ अलंकृतंसुवर्णेननमामिहरिमीश्वरं ३९ नमोभ्रवपुषेविष्णोस्त्रग्विनेवनमालि
ने ॥ प्रसन्नायनमस्तेस्तुनमःकौस्तुभधारिणे ४० नमःप्रसन्ननेत्रायप्रणतार्तिहरायते ॥ सुनाशसुक

कुत्रचित् ॥ अस्थीनितस्ययाचंतुयूयंवैत्रिदिवौकसः १९ इतिश्रुत्वावचोदेवाःशक्रमुख्यास्तदाचते ॥
अस्मान्वैप्रेषयामासुर्भवतश्चांतिकेततः २० शक्रादिभ्यश्चदेवेभ्योभवान्परमधार्म्मिकः ॥ अस्थिदानं
प्रदेहित्वमस्माकंवचनाच्चहि २१ गमिष्यतिक्षयंवृत्रोतवकीर्तिदिगंतरं ॥ दधीचिरुवाच ॥ धन्योहं
चास्थिमेधन्यंयस्माद्देवाःप्रवृद्धये २२ ददामिनास्तिसंदेहोनियमश्चमयाकृतः ॥ असमुद्रेषुतीर्थेषु
स्वर्गनागस्थितेषुच २३ तेषुस्नात्वाह्यहंविप्राःप्राणांस्त्यक्ष्यामिनान्यथा ॥ तस्माद्यूयमृषिश्रेष्ठाःग
च्छध्वंशक्रसन्निधौ २४ मयाह्युक्तंहिवृत्तांतंकथयध्वंसर्वमाशुच ॥ इतिराज्ञोवचःश्रुत्वाजग्मुस्तेत्रिद
शालयं २५ तद्वृत्तंकथयामासुरिंद्रमुख्यान्दिवौकसान् ॥ श्रुत्वामहेन्द्रोवृत्तांतंदधीचेर्हिमहात्मनः
२६ इतिसंमंत्र्यदेवैश्चत्रिषुलोकेषुदधीचिकः ॥ तीर्थेषुचकदास्नानंकरिष्यतिदेवसत्तमाः २७ कदा
तस्मैवचास्थीनिसंप्राप्ष्यवृत्रदानवं ॥ जह्मामोमहाप्राज्ञागच्छध्वंत्वरितंहिवः २८ तीर्थानियानि
आकाशेमृत्युनागस्थितानिच ॥ नीत्वातानिमहाप्राज्ञागच्छध्वंतस्यचाश्रमं २९ इंद्राज्ञप्तास्ततोदेवाः

तवसांप्रतं ७ इतितेषांवचःश्रुत्वादधीचिर्वाक्यमब्रवीत् ८ ॥ दधीचिरुवाच ॥ वृद्धिःसुराणांविप्राणां
रोचतेनात्रसंशयः ॥ युष्मदागमनेविप्राःकहेतुरितिकथ्यतां ९ ॥ ऋषयःऊचुः ॥ नाम्नावृत्रासुरोह्या
सीदसुरोवलदर्पितः ॥ तेनजिताःमहाराजदेवाश्चेंद्रपुरोगमाः १० जिताश्चसकलाःदेवाअसुरेणत
दाचते ॥ मघवानंपुरस्कृत्यब्रह्माणंशरणंययुः ११ ऊचुस्तेप्रणताःसर्वेशक्रमुख्याःदिवौकसः ॥ भगव
नूदेहिशरणमस्मभ्यंकमलासन १२ महावलेनवृत्रेणजिताश्चरणमूर्द्धनि ॥ शक्रादीनांचदेवानांश्रु
त्वावचनमातुरं १३ ध्यानदृष्टिस्तदाब्रह्मावृत्रमृत्युमशोधयत् ॥ त्वांचवैदृष्टवान्ब्रह्मातपंतंतेजसोज्व
लं १४ जामदग्नेश्चवाणौश्चवज्रीभूतंशरीरकं ॥ तवअस्थ्युद्भवेनैववज्रेणराजसत्तम १५ वृत्रासु
रस्यमृत्युर्हिदृष्टवान्प्रपितामहः ॥ दृष्टावृत्रस्यमृत्युर्वैविरंचिर्ध्यानदृष्टिकः १६ शक्रादींश्चैवदेवांश्च
गिरासंवोधयंश्चसः ॥ प्रत्युवाचविरंचिस्तान्देवानिंद्रपुरोगमान् १७ शृणुध्वंदितिजाःदेवाःइन्द्रा
द्याःवृत्रपीडिताः ॥ राजर्षेहिदधीचेश्चअस्मिन्वृत्रासुरस्यहि १८ मृत्युर्वैकिलविहितोन्यदुपायंनैव

Digitized by Google

तामहात्मना ६३ वज्रदेहस्ततोभूत्वाकरोतिम्वांमहत्तपः ॥ अस्थीनितस्ययाचंतुयूयंसर्वेदिवौकसः
६४ तेषांकृत्वामहावज्रं मारयन्तुसुरद्विषः ॥ अस्थ्युद्भवेनवज्रेणमृत्युर्वृत्रासुरस्यहि ६५ इत्ये
वंवाक्यमाकर्ण्यविरञ्चिस्त्रिदिवौकसः ॥ सप्तर्षीन्प्रेषयामासुर्जग्मुस्तस्याश्रमंद्विजाः ६६ ॥ इति
श्रीस्कन्दपुराणेउमामहेश्वरसम्वादे मिश्रितमाहात्म्येसप्तमोऽध्यायः ॥ ७ ॥

ईश्वरउवाच ॥ अथात्रिश्चवशिष्ठश्चअंगिराश्चमहातपाः ॥ भारद्वाजोमरीचिश्चकौशिकोभृगुरे
वच १ एतेसप्तर्षयोदेविकमण्डलुजटाधराः ॥ आगतास्तेमहादेविदधीचेश्चाश्रमंततः २ तान्मुनी
न्नागतान्दृष्ट्वाराजाधर्मभृतांवरः ॥ अभिवाद्यददौतेभ्यआसनानिपृथक्पृथक् ३ प्रत्युवाचसतांरा
जाक्षत्रधर्मभृतांवरः ४ ॥ दधीचिरुवाच ॥ नमोनमःऋषिसप्तभ्योयुष्माकंकरवामकिं ॥ इतिराज्ञो
वचश्श्रुत्वाऊचुस्तेऋषिसत्तमाः ५ ॥ ऋषयःऊचुः ॥ सत्यंकथयराजर्षेपृष्टोयस्त्वंचसांप्रतं ॥ देवासु
राणांजगतामादिमूलंपितामहः ६ सुराणामसुराणांचद्वौपक्षौकथयंतिहि ॥ केषांवृद्धिःक्षयंकेषांरोचते

तथाचेन्द्रोश्चाधिकारंयमस्यच॥ वरुणस्यचाधिकारंसःकुवेरस्यतथापुनः ५२ सवैवह्नेस्तथाकर्मपव
नस्यतथापिच ॥ स्वयमेवस्थितोदैत्यश्चान्येषांचतथापुनः ५३ देवांश्चैवमहादैत्यःसर्वदैत्यजनेश्वरः॥
स्वर्गान्निष्काशितास्तेनवृत्रेणैवदुरात्मना ५४ विचरामोयथामर्त्याभ्रष्टराज्याःपराजिताः ॥ एतत्पि
तामहात्तेवैकथितंवृत्रचेष्टितं ५५ यथातस्यक्षयंभूयात्तदुपायंवदप्रभो ॥ इतितेषांवचःश्रुत्वाब्रह्मात्तत्र
पितामहः ५६ ध्यानेनामग्नचेताभूत्सुप्तमीनोयथोदकः ॥ ध्यानेनदृष्टवान्ब्रह्मासप्तद्वीपांवसुन्धरां
५७ सपर्वतांतदावेधाःसप्तसागरमेखलां॥ भूमण्डलेतपंतंवैराजानंतेजसोज्वलं५८ परशुराममहावा
णैर्वज्रीभूतशरीरकं ॥ अपश्यत्पितामहस्तत्रउवाचत्रिदशान्प्रति ५९ अस्त्युपायोमयादृष्टोअसुराणां
भयावहः ॥ प्रार्थयध्वंदधीचिंवैयूयंसर्वेदिवौकसः ६० परशुरामोमहातेजाःक्षत्रियाणांयमोपमः ॥
त्रिसप्तवारंपृथ्वींहिकृत्वाक्षत्रियवर्जितां ६१ यैर्बाणैःसमहातेजाःसर्वशस्त्रभृतांवरः ॥ पंचबाणाश्चते
देवाःधृत्वाचैवदधीचिके ६२ रामावतारेसंप्राप्तेययौतप्तंमहत्तपः ॥ दधीचिनाहितेबाणाःपिष्ट्वापी

वीन् ॥ चक्र उवाच ॥ आगता ऋषयः सर्वे मम पृष्ठं समंततः १६ दर्शयामि ततस्तेषां सप्तद्वीपां वसुन्धरां ॥
इत्युक्ते सह चक्रेण ऋषिवृंदं परिभ्रमन् १७ भ्रमत्यस्मिन्महाचक्रे भुवनानि चतुर्दश ॥ तीर्थानि च परित्य
ज्य देवतायतनानि च १८ कुरुक्षेत्रं च केदारं भैरवं चादिशोणकं ॥ महालयं प्रयागं चैव गंगासागरसंगमे
१९ नर्मदां जाह्नवीं चैव कनखलं बद्रिकाश्रमं ॥ जालंधरं परित्यज्य रुद्रकोटीश्वरं तथा २० श्रीपर्वतम
तिक्रम्य देवकोटिं सरस्वतीं ॥ वाराणसीं तथा पुष्करं गोकर्णं नीलकंठकं २१ सुवर्णाख्यं तथा विंध्यं ग
ङ्गाद्वारं तथापरं ॥ सप्तद्वीपावतीं पृथ्वीं सनगां ससरित्सागरां २२ सर्वमेतत्परित्यज्य आगतं नैमिषं वनं ॥
तत्रैव दृष्ट्वा महाक्षेत्रं सर्वतीर्थविनिर्मितं २३ मिश्रितं हि महातीर्थं ब्रह्मचक्रं सदा च तत् ॥ मिश्रिते [illegible]
भागे योजनप्रमितं भुवि २४ पतितं चक्रमध्यात्स्यं त्रिषु लोकेषु विश्रुतं ॥ एतत्ते कथितं देवि माहात्म्यं मुमि
श्रितस्य च २५ अथ वक्ष्ये महादेवि किमन्यच्छ्रोतुमिच्छसि २६ ॥ इति श्रीस्कंदपुराणे उमामहेश्वरसंवादे
मिश्रितमाहात्म्ये नवमोऽध्यायः ॥ ९ ॥

पार्वत्युवाच ॥ अथवै श्रोतुमिच्छामि मिश्रितं गतवान्नरः ॥ सचकिंफलमाप्नोतिस्नानेदानेचकिंफ
लं १ मौनं दानेचफलं ब्रूहियःकरोतिपिंडपातनं ॥सचकिंफलमाप्नोतिएतन्मेब्रूहिशङ्कर २ ॥ ईश्वरउ
वाच ॥ धन्यास्तेमानवाःलोके मिश्रितेनिवसंतिये ॥ मिश्रितेनिमिषंस्थित्वा सर्वकिल्बिषनाशनाः ३
यत्रवैऋषयःसर्वेतपःकुर्वंतिनिस्पृहाः ॥ संसारभयसंत्रासंपरित्यज्यसमंततः ४ आगत्यब्रह्मणाचात्रस
र्वेदेवाःप्रतिष्ठिताः ॥ यस्मिन्तीर्थेतथाकोटिकोटितीर्थपरंतथा ५ सर्वतीर्थसमाख्यातंसार्द्धकोटित्रयं
प्रिये ॥ शृणुदेविप्रवक्ष्यामिसर्वेषांचहितायवै ६ मिश्रितस्यचमाहात्म्यंसर्वपापप्रणाशनं ॥ कुरुक्षेत्रे
तुयत्पुण्यंराहुग्रस्तेदिवाकरे ७ तत्फलंलभतेदेविमिश्रितस्यैवदर्शने ॥ ब्रह्महत्यादिपापानिसंचितान्य
न्यजन्मनि ८ नाशयेत्तत्क्षणादेवमिश्रितस्यैवदर्शनात् ॥ मघांकोटिप्रदानेनयत्फलंव्रतसेवनात् ९
तत्पुण्यंलभतेदेविमिश्रितस्यचमज्जनात् ॥ प्रभातेमिश्रितेस्नात्वापितृपिंडंप्रदापयेत् १० ब्राह्मणे
भ्यस्ततोदद्यात्कृष्यादानंयथाश्विनि ॥ सार्द्धकर्पटकोभूत्वाउपवासंतुकारयेत् ११ गोदानमश्वदान

Digitized by Google

ऽपकृत्वाकुर्याच्चपारणां ॥ मुष्टिमात्रन्तुयोभिक्षांब्राह्मणायप्रयच्छति १२ मिश्रितेचविशालाक्षिस्नातु
मेरुत्वमाप्नुयात् ॥ पुष्करेतुतपःकृत्वावर्षाणिशतपंचच १३ तत्फलंसमवाप्नोतिमिश्रितस्यचदर्शने ॥
एतत्तेकथितंदेविमिश्रितेचैवयत्फलं १४ स्नानेपद्मपलाशाक्षिकिमन्यच्छ्रोतुमिच्छसि ॥ पार्वत्युवाच ॥
यत्त्वयाकथितंदेवराज्ञेचैवदधीचये १५ ब्राह्मणाचवरोदत्तोमिश्रितस्यप्रदक्षिणे ॥ कथंविरचितंत्रमुखा
देवास्तंमिश्रितंप्रभो १६ फाल्गुनेमासिदेवेशिशुक्लाप्रतिपदाहिया ॥ तदारभ्यदशम्यन्तंकथंचक्रुःप्र
दक्षिणां १७ पुनर्मिश्रितमागत्यकथंस्नानंप्रचक्रमुः ॥ एतन्मेसर्वमाख्यानंब्रूहिविस्तरतोविभो १८
ईश्वरउवाच ॥ दधीच्यस्थ्युद्भवंनैववज्रेणचैवपार्वति ॥ निहतेवृत्रासुरेदैत्येब्रह्मेंद्रप्रमुखाःसुराः १९
स्मृत्वाघरंपुरादस्तंराज्ञेचैवदधीचये ॥ फाल्गुनेमासिआगत्यचोत्तमंनैमिषवनं २० मिश्रितंप्रवरंतीर्थं
चक्रुर्देवाःप्रदक्षिणां ॥ शुक्लप्रतिपदायांचस्नात्वातत्रेवदेवताः २१ आगत्यकुकुटग्रामंवासंतत्रप्रचक्र
मुः ॥ संस्थाप्यद्वारकातीर्थंस्नात्वातत्रैवदेवताः २२ इत्येवमूचिरेतत्रब्रह्मेन्द्रप्रमुखाःसुराः ॥ योनरः

श्चात्रआगत्यद्वारकायांमहोत्तमः २३ अत्रैवद्वारकाक्षेत्रेपिण्डंदद्याच्चमानवः ॥ उद्धरेत्सप्तगोत्राणिकु
लमेकोत्तरंशतं २४ अन्यच्चविविधंदानंयेकुर्वंतिचमानवाः ॥ अतेविमानमारूढाःजायन्तेवैष्णवंपदं
२५ ॥ इतिप्रथमदिनवासः ॥ द्वितीयायांसमुत्थायब्रह्मेंद्राद्याश्चदेवताः ॥ हरियामंततोजग्मुस्समु
त्तीर्यचगोमतीं २६ वासंचकारयामासुर्द्वितीयेदिवसेपुनः ॥ इत्येवमाचरेद्देवाःहरियामेवसेत्पुमान्
२७ योनरश्चात्रआगत्यगोमत्यांस्नानमाचरेत् ॥ दत्वादानंयथाशक्तिमहादेवंप्रपूजयेत् २८ रात्रौ
जागरणेनैवहरेश्चउत्तमांकथां ॥ सर्वपापविनिर्मुक्तोरुद्रलोकेवसेच्चिरं २९ ॥ इतिद्वितीयदिनवासः ॥
तृतीयायांसमुत्थायस्नात्वाहत्वाहरेचवै ॥ पुनश्चदेवास्संजग्मुःकुस्थानग्राममुत्तमं ३० इत्येवमूषि
रेतत्रदेवाश्चैवचपार्वति ॥ अत्रागत्यनरश्चैवसर्वदंभविवर्जितः ३१ पक्वाद्यैःपायसाद्यैश्चब्राह्मणा
न्भोजयेत्सुधीः ॥ रात्रिशेषंनयेद्धीमान्गीतवादित्रमङ्गलैः ३२ सप्तजन्मार्जितंपापंहन्यतेनात्रसंश
यः ॥ इतितृतीयदिनवासः ॥ चतुर्थ्यांतुततःकृत्वाप्रातःस्नानंतुदेवताः ॥ पुनश्चतेचसंजग्मुःग्राममोहु

म्बरंतथा ३३ स्नात्वाचत्तीर्थकेचैवनेमिसज्जनसंज्ञके ॥ इत्येवमूचिरेसर्वेदेवाश्चेन्द्रपुरोगमाः ३४ अ
त्रागत्यनरश्चैवमहादेवंप्रपूजयेत् ॥ दानन्दत्वायथाशक्तिजागरणेननयेन्निशां ३५ मुच्यतेसर्वपापे
भ्योस्वर्गलोकंसंगच्छति ॥ इतिचतुर्थदिनवासः ॥ पञ्चम्याञ्चसमुत्थायदेवाश्चेन्द्रपुरोगमाः ॥ ग्रा
मंघेवोत्तमंजग्मुःशङ्खिनीनामविश्रुतं ३६ गङ्गासागरकेचैवशङ्खतीर्थेतथापुनः ॥ स्नात्वादेवगणाःसर्वइ
त्येवंवाक्यमूचिरे ३७योनरश्चात्रआगत्यशङ्खिनीग्रामसंज्ञके ॥ स्नानंकृत्वाविधानेनगङ्गासागरसंज्ञ
के ३८ शङ्खतीर्थेपुनश्चैवदत्वादानंयथाविधिः ॥ सप्तजन्मार्जितंपापंभस्मसाद्भवतिक्षणात् ३९ ॥
इतिपञ्चमदिनवासः ॥ ब्रह्मेन्द्राद्याश्चदेवाश्चषष्ठेचदिवसेपुनः ॥ देवग्रामंततोजग्मुःस्नात्वात्रैव
पार्वति ४० देवप्रयागेतीर्थेचइत्येवंवाक्यमूचिरे ॥ अत्रागत्यनरोधीमानसर्वदंभविवर्जितः ४१ देव
प्रयागेतीर्थेचस्नात्वाचशुद्धमानसः ॥ ब्राह्मणान्तोषयेद्धीमान् दत्वादानञ्चपार्वति ४२ रात्रिशेषंन
येद्धीमान्सर्वपापंव्यपोहति ॥ इतिषष्ठदिनवासः ॥ सप्तमेदिवसेचैवदेवाश्चेन्द्रपुरोगमाः ॥ स्नात्वा ४१

च उत्तमंतीर्थंदिव्यंमानसरोवरं ४३ इत्येवंवाक्यमूचुस्तेब्रह्मेन्द्राद्याश्चदेवताः ॥ अत्रतीर्थेनरश्चैवपि
त्ह्रंश्चतर्पयेत्सुधीः ४४ ब्राह्मणान्भोजयेद्धीमान्निर्मलत्वमवाप्नुयात् ॥ स्नात्वासरोवरंदिव्यंदेवाश्चेन्द्र
पुरोगमा ४५ वाल्मीकस्याश्रमंपश्यमंडग्रामंततोययुः ॥ मण्डरीकऋषेश्चैवस्थानंतत्रैवचोत्तमं ४६
प्रपश्यदेवताःसर्वेवासंतत्रप्रचक्रमुः ॥ एवंयःकुरुतेप्राप्तंस्वर्गलोकंसगच्छति ४७ ॥ इतिसप्तमदिनवा
सः ॥ अथाष्टमेतुदिवसेहरिद्वारंप्रपश्यच ॥ तस्मिन्सरेकृतंस्नानंदेवैश्चेन्द्रपुरोगमैः ४८ ततोजग्मु
र्महादेवितरुमालिंग्यपर्वतः ॥ मधुकाख्यंमहावृक्षंजलग्रामंततोययुः ४९ इत्येवंवाक्यमूचुस्तेब्रह्मा
द्याश्चैवदेवताः ॥ जलग्रामेचआगत्यदत्वादानानिमानवः ५० सनरःसर्वपापेभ्योमुच्यतेनात्रसंश
यः ॥ इत्यष्टमदिनवासः ॥ अष्टम्यांविनिवृत्तायांनवम्यांप्रातरेवहि ॥ ब्रह्माद्याःदेवताःसर्वेदधिक्रो
शेश्वरंययुः ५१ प्रपश्यचगयांपुण्यांनत्वादेवंगदाधरं ॥ इत्येवंवाक्यमूचुस्तेदेवाश्चेन्द्रपुरोगमाः ५२
अत्रागत्यनरश्चैवपिण्डंदद्याद्गयाशिरे ॥ दक्षिणांब्राह्मणेदत्वापितॄन्संतोषयेत्पुमान् ५३ पुनश्चते

Digitized by Google

चत्राजग्मुःचक्रतीर्थंमहोत्तमं ॥ तत्रस्नात्वाविधानेनब्रह्मेन्द्रप्रमुखाःसुराः ५४ ललितांस्थापयामासुः
सर्वसिद्धिप्रदांशुभां ॥ इत्येवंवाक्यमूचुस्तेब्रह्मेन्द्रप्रमुखाःसुराः ५५ अत्रागत्यनरोधीमान्स्नात्वाच
क्रेमहोत्तमं ॥ ललितांपूजयेच्चैववाञ्छितंफलमाप्नुयात् ५६ पिण्डंदद्याच्चक्रतीर्थेपितॄन्संतोषयेत्पुमा
न् ॥ वदंतिपितृसंतुष्टःकिमन्यःपुत्रसंग्रहैः ५७ विशेषातुपरंदेवीफाल्गुनस्यासितेतरे ॥ नवम्यांपिण्ड
दानेनयत्फलंकवयोविदुः ५८ नतच्छक्यंमयावक्तुंकल्पकोटिशतैरपि ॥ रात्रिशेषंनयेद्धीमान्कथयामि
श्रितस्यच ५९ ॥ इतिनवमदिनवासः ॥ दशमेदिवसेस्नात्वाचक्रतीर्थेकृतक्रियाः ॥ पुनश्चदेवाःसंज
ग्मुःविष्णवावर्त्तमहोत्तमं ६० विष्णवावर्तेततःस्नात्वावाणगंगांप्रपश्यच ॥ वाणगङ्गांतरेरम्येवासंतत्र
प्रचक्रमुः ६१ इत्येवंवाक्यमूचुस्तेब्रह्मेन्द्राद्याश्चदेवताः ॥ अत्रागत्यनरोधीमान्दानंदत्वायथाविधिं
६२ वद्रीनारायणंदेवंकेदारंचतथापुनः ॥ पूजयेच्चनरोधीमान्विष्णुलोकेवसेच्चिरं ६३ रात्रिशेषंनये
द्धीमान्स्मरंध्यायंश्चमिश्रितं ६४ ॥ इतिदशमदिनवासः ॥ एकादशेतुदिवसेदेवाश्चैवचपार्वति ॥ चि

अपथोजलंस्नात्वासर्वतीर्थविमिश्रितं ६५ मिश्रितंतेचआजग्मुःसर्वतःकृतदक्षिणाः ६६ प्रदक्षिणा
याविधिमुत्तमंवैश्रुत्वागिरीशेशसुताप्युवाच ॥ श्रुतंमयासर्वमनूपर्वं विभोब्रवीषिउक्तंयन्मिश्रितेफलं
६७ ॥ इतिश्रीस्कन्दपुराणेउमामहेश्वरसम्वादे मिश्रितमाहात्म्येदशमोऽध्यायः ॥ १० ॥

ईश्वरउवाच ॥ एकादशेतुदिवसेआगत्यमिश्रितंपुमान् ॥ मंत्रेणानेनदेवेशिपूजयेन्मिश्रितंपरं १
श्रीमिश्रितसकलतीर्थराजत्वंअनुग्रहमुनिमण्डलिनाज्ञयाप्रदक्षिणातथा भ्रमणाकृतंयतेमिश्रिततवधि
लोकेनेनपरिपूर्णमस्तु २ श्रीमिश्रितंसकलतीर्थमहंनमामिसाद्धत्रिकोटिसहितमघनाशनंच ॥ का
येनवाङ्मनसतोममयांवभूवपापानितानिशमयस्वहनप्रसादात् ३ प्रार्थ्यैवंमिश्रितंतीर्थमेकादश्या
मुपोषितः ॥ पुष्पाणिचसुगन्धानिनैवेद्यंमधुरंतथा ४ शुभ्रसूत्रमयीवर्त्तीप्रदीपेचनिषेविता ॥ वस्त्राणि
चविचित्राणिसुवर्णाभरणंतथा ५ एवंपूजाविधानेनमिश्रितस्यैवमानवः ॥ निहन्यात्सर्वपापानिवि
ष्णुलोकंसगच्छति ६ आचरेन्मिश्रितक्षेत्रेततःस्नानंसमाहितः ॥ सुवर्णरजतंब्रीहिदद्यादश्वंचहस्ति

नं ७ स्नानं कृतंमिश्रितसज्जलेनयैर्मानवैःस्तेपिभवंतिशुद्धाः ॥ कुर्वंतियेश्राद्धविधिंतुतत्रतेभ्यःप्रसन्नाः
पितरोभवानि ८ पिण्डदानंततःकृत्वापितॄंश्चतर्पयेत्पुमान् ॥ उद्धरेत्सप्तगोत्राणिकुलमेकोत्तरंशतं ९
पितामाताचभार्य्याचभगिनीदुहितापतिः ॥ पितृष्वसामातृष्वसासप्तगोत्राणिवैविदुः १० पायसे
नापिचरुणाशक्तुनापिष्टकेनवा ॥ तंदुलैःफलमूलाद्यैःमिश्रितेपिण्डदोनरः ११ उद्धरेत्सप्तगोत्राणि
स्वर्गलोकेवसेच्चिरं ॥ गोदानमश्वदानंचपात्रंवस्त्रादिभूषणं १२ प्रदद्याद्द्विजमुख्येभ्योचैकादश्यांफ
लप्रदं ॥ गृहाच्चलितमात्रेणतीर्थंतीर्थंविमिश्रिते १३ स्वर्गारोहणसोपानंपितॄणांचपदेपदे ॥ एकाद
श्यपोषितःशृण्वन्मिश्रितकथावरांगीतवादित्रमंगलैः ॥ रात्रिशेषानयेत्सुधीर्द्वादश्युष पुनःश्राहप्रातः
कृत्यंविधायसः ॥ प्रदक्षिणांततोविधायमिश्रितेस्नानंसमाचरेत् १४ हिरण्यंरजतंचैवविप्रदद्याद्धि
सप्तकं ॥ वस्त्रालंकारदानान्तितत्रस्नानंफलप्रदं १५ सप्तद्वीपावतींपृथ्वींयःकरोतिप्रदक्षिणां ॥ तत्फ
लंलभतेदेविमिश्रितस्यप्रदक्षिणे १६ मिश्रितंकीर्त्तमानोपिसर्वपापैःप्रमुच्यते ॥ मिश्रितंप्रविशेद्यस्तु

संप्रविष्टंत्रिविष्टपं १७ स्नानंकृत्वाविधानेनद्वादश्यांशुद्धमानसः ॥ आदौप्रकल्प्यदेवेशिमुण्डनंफल
भाग्भवेत् १८ मुण्डनंचोपवासञ्चसर्वतीर्थेष्वयंविधिः ॥ विशेषेणाचकर्त्तव्यौमिश्रितोपवासमुण्डनौ
१९ मिश्रितस्यचमज्जनेयफलंमुनिभिरुदीरितंसमस्तयोगसाधनैःकृतक्रियैश्चैवपार्वति ॥ नाहृतंदे
वमीरितुंकल्पकोटिशतान्वितैरब्दैश्चैवसुंदरिकथितंसूक्ष्मतरंहितत् २० इत्थंनिशम्येशमुखाद्भवा
नीवाणीमुदारांपुनरप्युवाच ॥ इच्छाम्यहंश्रोतुमतीवपुण्यामुदारमाहात्म्यमपिमिश्रितस्य २१ एवं
भवान्यामधुरंगिरंतामाकर्ण्यगंगाधरइत्युवाच ॥ यद्ब्रह्मणाव्यासमुखेभ्यउक्तन्ततोपुरस्तात्कथया
मिदेवि २२ इत्युक्त्वाचांकमारोप्यभवानींभक्तवत्सलः ॥ रोमांचितांगोविश्वेशःसमालिंग्याब्रवीच्छि
वां २३ ॥ ईश्वरउवाच ॥ पुनरन्यत्प्रवक्ष्यामिद्वादश्यांमिश्रितेफलं ॥ यत्कृत्वामिश्रितेदेविनरश्चफ
लभाग्भवेत् २४ तीर्थंचमिश्रितंयत्रसर्वपापप्रणाशनं ॥ तत्रचान्नंचपिंडंचपितृणांदत्तमक्षयं २५ या
वज्जन्मकृतंपापंहरत्त्वंमेचमिश्रितं ॥ हरमिश्रितमघापंयावज्जन्मकृतंभुवि २६ याःकाश्चित्तिथयःप्रो

Digitized by Google

काःपुण्यतीर्थेविशेषतः ॥ तास्वेवंयव्रतंकुर्यान्मिश्रितस्यसमीपतः २७ फाल्गुनस्यसितेपक्षेद्वादश्यांच
यशस्विनि ॥ अहोरात्रोषितोभूत्वाशुद्धात्मानियतःशुचिः २८ प्रभातेविमलेचैवचरुकंश्रयथेनरः ॥
येनयेनविधानेनमंत्रंवक्ष्यामिसुंदरि २९ मिश्रितेयानितीर्थानिपुण्यान्यायतनानिच ॥ तानिसर्वा
णिआयांतुममपापंव्यपोहतु ३० विशुद्धमानसोभूत्वाशुद्धात्मानियतश्शुचिः ॥ तत्रप्रजापतिर्देवईशा
नोविष्णुभास्करौ ३१ तेसर्वइहआयांतुपितृणांमोक्षकारकाः ॥ मंत्रेणानेनसंगृह्यतंदुलप्रसृतित्रयं
३२ क्षिपेच्चरुकमध्येतुविधिनानेनसुंदरि ॥ प्रज्वाल्यपावकंचाथोज्वलितंचोग्रतेजसम् ३३ पच्यमानं
चरुंचैवतूर्णमुद्धारयेच्चरुं ॥ पश्चाद्दोदनसंपूर्णंचरुकंसंयतोनयेत् ३४ विशुद्धमानसोभूत्वामानवःसंय
तोभवेत् ॥ कृत्वासदैवतंश्राद्धंनरस्तृप्तिपितृन्नयेत् ३५ पितृपितामहंचैवयेकेचित्प्रपितामहाः ॥ अ
न्येपिपितरःसर्वेकुलसंतानकारकाः ३६ सर्वेतेतृप्तिमायांतुपिंडदानेनमिश्रिते ॥ अपरंरुक्मपात्रंतुप्र
दद्यान्मिश्रितायतः ३७ साधुसाध्वितिवैव्योम्निवदंतिवरवर्णिनी ॥ पितृणांदुन्दुभीशब्दःश्रूयतेग्र

पिसुंदरि ३८ सुवर्णंरजतंकांस्यंताम्रमन्नंचगौस्तथा ॥ अक्षयंमिश्रितंदत्तंपितरःस्वर्गसंस्थिताः ३९
तुरंगांहस्तिनंवस्त्रंकन्यादानंचयत्कृतं ॥ मिश्रितेलभतेपुण्यंपितरःस्वर्गगामिनः ४० नृत्यंतिपितरस्त
स्यगायन्तेचमुहुर्मुहुः ॥ दिव्यंविमानमारूढायावद्इन्द्राश्चतुर्दश ४१ नश्यंतिसर्वपापानिस्वर्गवासो
नसंशयः ॥ पिण्डन्दत्वाविधानेनद्वादश्यांशुद्धमानसः ४२ ब्राह्मणान्भोजयेद्धीमान्दानंदत्वायथाविधि
धिः ॥ यतीलक्षसहस्राणिभोजयेच्चदिनंदिनं ४३ मिश्रितेतत्फलंदेविविप्रस्यैकस्यभोजने ॥ भोज
यित्वाद्विजान्देवितताभुंजीतवैस्वयं ४४ एवंचैवव्यतीतायांद्वादश्यांतत्रपार्वति ॥ रात्रौजागरणेनैव
कथयामिश्रितस्यच ४५ ततोमिश्रिनेवरेसखिसखिंविलोक्यदधीचिकं ॥ समस्तकलिकल्मषक्षपणा
हेतुभूतंहरिं ४६ विधायविधिनानरःसुमुखिपारणांभूसुरैः ॥ समंहरिकथामृतमितिवदन्निशांसनये
त् ४७ त्रयोदश्यांप्रातरुत्थायस्नात्वातुमिश्रितनरः ॥ दत्वादानंद्विजेभ्यश्चदेवांश्चैवप्रपूजयेत् ४८
आदौतुविघ्नहंतारंपूजयेच्चविनायकं ॥ दातृकंसर्वसिद्धीनांहंतारंसकलापदः ४९ मोदकान्दशवैकृत्वा ४८

नैवेद्यंतुप्रकल्पयेत् ॥ तस्यार्द्धंतुपुनर्ग्राह्यंप्रथमंप्राशयेद्बुधः ५० जंभकानांचतुःषष्टिर्मिश्रितेचप्रति
ष्ठिताः ॥ महादेवास्तथाष्टौचदृष्टव्याःक्रमयोगतः ५१ यक्षाःषोडशविख्याताःस्थापितास्तेमहाधनाः॥
ततोगच्छेन्महादेविदक्षिणामूर्तिनामकं ५२ ब्रह्मणास्थापितंलिंगंसर्वसिद्धिकरंनृणां॥विल्वपत्रकृता
मालाशतमष्टोत्तरंतथा ५३ पुष्पाणिचसुगंधानिनैवेद्यंमधुरंतथा ॥ रक्तसूत्रमयीवर्तीप्रदीपेननिषेवि
ता ५४ एवंपूजाविधानेनसहन्यात्सर्वपातकं॥ ततोगच्छेन्महादेविमिश्रितेपश्चिमेतटे ५५ दधीचिं
चस्थितंदेवंसर्वदेवनमस्कृतं ॥ पुष्पाणिचविचित्राणिनैवेद्यंमधुरंतथा ५६ वस्त्राणिचविचित्राणिसुव
र्णाभरणंतथा ॥ अग्रतोदीपकंदद्याद्दधीचिंतेजसोज्वलं ५७ एवंतुपूजयेद्देवंस्त्रीवापुरुषोपिवा ॥ नच
शोकमवाप्नोतिस्वर्गवासोनसंशयः ५८ गंधदानेनगंधाढ्योससुखःपुष्पदानतः ॥ वस्त्राभरणदानैश्च
शक्रतुल्यंपदंलभेत् ५९ दधीचेर्दक्षिणेभागेपूजयेन्महिषमर्दिनीं ॥ सर्वपापविनिर्मुक्तोरुद्रलोकंसग
च्छति ६० तस्याश्चपश्चिमेभागेकूपंकृत्वाप्रदक्षिणं ॥ हत्वासमस्तपापानिस्वर्गलोकेवसेच्चिरं ६१

Digitized by Google

कूपस्येशानदिग्भागेवटमाश्रित्ययोनरः ॥ पिण्डंदद्यान्महादेविकुलानांशतमुद्धरेत् ६२ विष्णुपादौ
तुसंस्मृत्वाविष्णुलोकंसगच्छति ॥ अमरकंटकमालिंग्यरामेणस्थापितंपुरा ६३ रामोपिरावणंहत्वा
ब्राह्मणंदेवकंटकं ॥ ब्रह्महत्यापराभूत्वा चक्रेत्रीनश्वमेधकान् ६४ तथापिमनसापापंनगतंतस्यधीम
तः ॥ ततःसरामोत्रागत्यतीर्थंतीर्थंविमिश्रितं ६५ स्नात्वाशुद्धमनःभूत्वामिश्रितस्यतटेचसः ॥ स्था
पयामासदेवेशिअमरकंटकवृक्षकं ६६ अमरकंटकमाश्रित्यपिंडंदद्याच्चयोनरः ॥ तारये सनरश्रेष्ठः
कुलानामेकविंशतिं ६७ सुवर्णंरजतंब्रीहिदद्यादश्वंचहस्तिनं ॥ स्वर्गलोकेवसेद्देवियावदिन्द्राश्चतु
दश ६८ कंटकंपूर्वदिग्भागेअनंतंसस्पृशन्नरः ॥ ब्रह्महत्यादिकंपापमशेषंविनिहंतिवै ६९ मिश्रित
स्योत्तरेभागेकूपस्नानंसमाचरेत् ॥ तीर्थषष्टिसहस्राणिसीताकूपेविशंतिच ७० तत्रस्नात्वातर्पयतेदे
वर्षिपितॄमानवाः ॥ निर्वपेत्पितृपिंडंयःमानवःसंशितव्रतः ७१ गोदानमन्नवस्त्रादिदद्यात्पात्रेषुभूरि
शः ॥ एवंयःकुरुतेस्नानंसीताकूपेसमाहितः ७२ कुलानितारयेत्सप्तआत्मानंचविशेषतः ॥ विशेषा ५०

त्फाल्गुनेमासिचतुर्दश्यांतुयोनरः ७३ सीताकूपकृतेस्नानंकुलमष्टोत्तरंतरेत् ॥ पुष्कराद्यानितीर्थानि
गंगाद्यास्सरितस्तथा ७४ तत्फलंसमवाप्नोतिकूपंकृत्वाप्रदक्षिणं ॥ षष्टिवर्षसहस्राणिपुण्यतीर्थाव
गाहनात् ७५ तत्फलंलभतेदेविसीताकूपस्यमज्जनात् ॥ सीताकूपंतुयोयातिस्नातुंवैश्रद्धयान्वितः
७६ पदेपदेश्वमेधस्यतस्यमुक्तिर्नसंशयः ॥ कूपस्यचोत्तरेभागेमौनक्षेत्रंतुनिर्मलं ७७ तत्रकुंडेशुचिस्ना
त्वापिंडंदद्यात्तुयोनरः ॥ सर्वपापविनिर्मुक्तोविष्णोःसायुज्यमाप्नुयात् ७८ मौनदानंप्रकर्तव्यंमौनक्षे
त्रेतुसुंदरि ॥ मौनक्षेत्रंसमाश्रित्यकाष्टमौनेसमाचरेत् ७९ तस्यैवपूर्वदिग्भागेकुंडंभरतसंज्ञकं ॥
तत्रस्नानंप्रकुर्वीतपिंडंदत्वायथाविधिः ८० रत्नदानंप्रकुर्वीतब्राह्मणेभ्यस्तदाधनं ॥ मृतेविमानमा
रूढोगच्छेत्स्वर्गंचमानवः ८१ तस्यैवदक्षिणेभागेब्रह्मक्षेत्रंमहोत्तमं ॥ ब्रह्मणांचकृतंयज्ञंपूर्णमब्द
शतंपुरा ८२ ब्रह्मक्षेत्रकृतेस्नानमश्वमेधफलंभवेत् ॥ तत्रदत्वासुवर्णान्तुधौतपापःप्रजायते ८३ त
स्यैवचोत्तरेभागेगंगासागरसंगमे ॥ स्नानंकृत्वाविधानेनतर्पयेत्पितृदेवताः ८४ ब्राह्मणेभ्योम

हादेविदत्वावस्त्रादिभूषणं ॥ पितरस्तस्यतत्रैवक्रीडंतिब्रह्ममंडले ८५ यज्ञवाराहकेतीर्थेस्नायात्तुमा
नवोत्तमः ॥ षष्टिवर्षसहस्त्राणिषष्टिवर्षशतानिच ८६ प्राप्नोतिमानवोवासोस्वर्गलोगेमहीयते ॥ तस्य
वायव्यदिग्भागेयज्ञकुंडंमहोत्तमं ८७ सुवर्णदानंतत्रैवकुर्यादेकाग्रमानसः ॥ सप्तजन्मार्जितंपापंनि
हन्यान्नात्रसंशयः ८८ मिश्रितस्योत्तरेभागेउत्तरेश्वरमर्चयेत् ॥ तस्यदर्शनमात्रेणहयमेधफलंलभेत्
८९ भद्रकालींततःस्पृष्ट्वापायसापूपशष्कुलीः ॥ ब्राह्मणान्भोजयेद्धीमान्पारणंप्रविधायच ९० ग
दाधरंततःस्पृष्ट्वामिश्रितेपूर्वकेतटे॥ तत्रपिंडप्रदानेनपितरःस्वर्गगामिनः ९१ षोडशस्वपिपित्रादीन्
श्राद्धंकृत्वापृथक्पृथक् ॥ दक्षिणांब्राह्मणेदत्वापितृन्संतोषयेत्पुमान् ९२ यज्ञमूर्त्तिं ततःस्मृत्वानीलं
वावृषमुत्सृजेत् ॥ भैरवंतुततःस्मृत्वाब्राह्मणान्भोजयेद्बहून् ९३ मोदतेविबुधैस्सार्द्धंशिवलोकेसमा
नवः ॥ भुवनेश्वरंततःपश्येत्सर्वपापंव्यपोहति ९४ ततश्चागत्यदेवेशिमिश्रितंपापनाशनं ॥ मन्त्रेणा
नेनदेवेशिसंकल्पंतुप्रकल्पयेत् ९५ आगतोहंमिश्रितस्यकुम्भस्थेचदिवाकरे ॥ ऋणत्रयविमुक्त्या

र्थंत्वंसाक्षीमिश्रितोत्तम ९६ सुवर्णंतुतथाव्रीहिंदद्यादश्वंचहस्तिनं ॥ एवंपूजाविधानेननरोदम्भविव
र्जितः ९७ षष्टिवर्षसहस्राणिषष्टिवर्षशतानिच ॥ उषित्वास्वर्गलोकेपिक्षीणपुण्योयदाभवेत् ९८ भुं
क्तेसविविधान्भोगान्तत्तीर्थंभजतेपुनः ॥ अन्तर्गृहीतुयात्रायांएवंकृत्वातुमिश्रिते ९९ त्रयोदश्यांचति
थ्यांवैचतुर्दश्यांनरःपुनः ॥ ब्राह्मणान्भोजयेद्धीमान्पायसापूपशष्कुलीः १०० गोदानमन्नवस्त्रादिद
द्यात्तेभ्यश्चभूरिशः ॥ एवंयःकुरुतेयात्रांमिश्रितेचसमाहितः १०१ कुलानितारयेत्सप्तआत्मानंचवि
शेषतः ॥ अनेनविधिनायात्रामेकादश्यांविधायच १०२ कृत्वावासंचद्वादश्यांततःकुर्वीतपारणं ॥ त्र
योदश्यांचतुर्दश्यांनरश्चसंशितव्रतः १०३ नियमेनकृतस्नानैर्दानतर्पणभोजनैः ॥ संप्राप्तायांपौर्ण
मास्यांस्नात्वावैमिश्रितेनरः १०४ ब्राह्मणान्तोषयेद्धीमान्दत्वादानानिभूरिशः ॥ दद्याच्चब्राह्मणेभ्य
स्तुवस्त्रालंकारभूषणं १०५ गोदानमश्वदानंचगजानश्वान्प्रदायच ॥ चन्दनेनाक्षतैःपुष्पैःब्राह्मणा
न्पूजयेत्सुधीः १०६ येषुतीर्थेषुयेदेवायेषुतीर्थेषुयेद्विजाः ॥ तेपुपूजानमस्कुर्याद्विशेषेणतुमिश्रिते १०७

थैर्विप्रामिश्रितेदेवि ऋषीणामेवतेशयं ॥ अतस्तेभ्योहियद्दत्तमक्षयंतद्भवेद्ध्रुवं १०८ यस्यविप्रेषुवि
श्वासोमिश्रितेकृतवासिषु ॥ अष्टाशीतिसहस्राणितस्यतुष्टं ऋषीश्वराः १०९ एवंविप्रांस्तुसंतोष्यमि
श्रितेषधनैर्वहु ॥ मन्त्रेणानेनदेवेशिमिश्रितंप्रणमेद्बुधः ११० श्रीमिश्रितंसकलतीर्थमहंनमामिसार्द्धं
त्रिकोटिसहितमघनाशनंच ॥ कायेनवाङ्मनसतोशमयान्वभूव पापानितानिशमयस्वहनप्रसादात्
१११ दधीचिकंततोभ्यर्च्यपुष्पगंधानुलेपनैः ॥ वस्त्राभरणदानैश्चततोगच्छेद्गृहंनरः ११२ इतिश्री
स्कन्दपुराणेउमामहेश्वरसम्वादेमिश्रितमाहात्म्येएकादशोऽध्यायः ॥ ११ ॥
ईश्वरउवाच ॥ अत्रैवोदाहरंतीहमितिहासंपुरातनं ॥ यंश्रुत्वाब्रह्मणस्स्थानंगच्छेद्वैमानवोत्तमः १
नानावृक्षसमाकीर्णंकोकिलारवसंकुलं ॥ पुष्कराणिपवित्राणिशोभनानिवनानिच २ शालैस्तालै
स्तमालैश्चविल्वैर्वकुलपाटलैः ॥ चिंचिनीवटवृक्षैश्चआम्रवृक्षैश्चचंपकैः ३ अश्वत्थैरर्जुनैर्वृक्षैरशोकैः
शोकनाशनैः ॥ जम्वुनिम्वुकदम्वैश्चकल्हारैर्वकुलद्रुमैः ४ तन्मध्येमिश्रितंतीर्थंसर्वाघौघविदारणं ॥

दधीचेःपरमंस्थानंपरंपुण्यंववित्रकं ५ तस्मिन्तीर्थेनिवसतिकपोतःपक्षिणांवरः ॥ वह्वाहारंकृतंतेनक
दाचिदपिशोभने ६ अजीर्णोभूत्सदादेविविचेष्टःपतितोभुवि ॥ नीत्वातंतत्रगृध्रेणपातितःकुण्डमध्यतः
७ सतत्रसलिलेकुण्डेतरंगात्क्लिन्नपक्षकः ॥ राजगृहेतुसंजातोकान्यकुब्जेतिशोभने ८ धनधान्यस
मायुक्तोगोधनैःसमलंकृतः ॥ हरिदत्तइतिख्यातोधर्मात्माज्ञानदृष्टिकः ९ वालकस्यमहावुद्धिर्यथावु
द्धिर्महात्मनः ॥ जातस्मरश्चतत्रैवइत्येवंवाक्यमूचवान् १० गमिष्येतीर्थप्रवरंमिश्रितंसुरसेवितं ॥
अस्तिकोपिमनुष्याणांयथानज्ञास्यतीतियः ११ इतिसंचिंत्यवहुधाईश्वरोवटुरूपधृक् ॥ आगतश्च
समीपेनवालकंप्रत्युवाचसः १२ कथयस्वमहाप्राज्ञकिमर्थंशोच्यतेभवान् ॥ वटोश्चैववचःश्रुत्वाहरि
दत्तमथाब्रवीत् १३ ॥ हरिदत्तउवाच ॥ कथयामिद्विजश्रेष्ठश्रृणुमेतद्वचनंशुभं ॥ अद्यमेनिशिविप्रें
द्रस्वप्नलब्धोमयानघ १४ गतोहंवनमध्येतुदृष्टंतत्रैवमिश्रितं ॥ देवगंधर्वयक्षैश्चअमरैःसहसेवितं
१५ स्नानंकुर्वंतितेसर्वेतस्मिन्तीर्थोत्तमेशुभे ॥ तेषांमध्येमहायोगीगणपतिश्चद्विजोत्तमः १६ कथां ५५

चकथयन्दृष्टोतस्मिन्तीर्थेचभूसुरः ॥ बृहस्पतिश्चतत्रैवशक्रंवचनमब्रवीत् १७॥ गुरुरुवाच ॥ इदन्तु
मिश्रितंतीर्थंनृणांमोक्षफलप्रदं ॥ अस्यैवदर्शनेनैंद्र अश्वमेधायुतंफलं १८ वाराणस्यांतुयत्पुण्यंवर्षा
णिअयुतंवसेत् ॥ तत्फलंलभतेशक्रमिश्रितस्यैवदर्शनात् १६ प्रयागेतीर्थराजेतुयोयजेतशतक्रतुं ॥
तत्फलंलभतेशक्रमिश्रितस्यैवदर्शनात् २० एताश्चान्याश्चवैवटोगुरुश्चैवोक्तवानतदा ॥ एतदृष्टं
मयारात्रौस्वप्नंचैवमहाद्भुतं २१ यदिजानासिविप्रेंद्रपधानांमिश्रितस्यच ॥ कृपयातन्मयाविप्रप्रत्य
क्षंकुरुमेभवान् २२ ॥ ईश्वरउवाच ॥ इतिश्रुत्वावचस्तस्यमयोक्तंगिरिनन्दिनि ॥ धन्यस्त्वंबालकप्रा
ज्ञनहित्वत्सदृशःक्कचित् २३ शृणुपुत्रप्रवक्ष्यामितीर्थमार्गमनुत्तमं ॥ उत्तरांदिशिचाश्रित्ययोजनंषटत्वं
व्रजः २४ तत्रतत्प्रवरंतीर्थंमिश्रितंसुरसेवितं ॥ इत्युक्तांतर्हितोभूत्वासोहंवैवरवर्णिनि २५ पितरौ
चसमाहूयबांधवान्बालकोब्रवीत् ॥ श्रूयतांमद्वचश्चैवपितश्चबांधवास्तथा २६ पूर्वजन्मन्यहंचैव
कपोतःपक्षिणांवरः ॥ वसामिमिश्रितंतीर्थेयोजनानंतरेणवै २७ एकदाचमयाताताहारंकृतंतत

दा ॥ अजीर्णेनैवसंप्राप्तोमृतश्चैवापतद्भुवि २८ प्रातःगृध्रेणसंदष्टोनीत्वाक्षिप्रस्त्वमिश्रिते ॥ सोहं
वैतत्रीर्थेचतरंगात्क्लिन्नपक्षकः २९ तवकुक्षौभवेज्जन्मतत्तीर्थस्यप्रभावतः ॥ गमिष्येतीर्थप्रवरंमि
श्रितंदेवदुर्लभं ३० इत्येवंवाक्यमाकर्ण्यप्रत्युचुःसाधुसाधुते ॥ वाहनैर्विविधैश्चैवआरुह्यतस्यबांध
वाः ३१ पितरौसहपुत्रेणआगतामिश्रितंशुभं ॥ दृष्ट्वातत्प्रवरंतीर्थंहरिदत्तोवाक्यमब्रवीत् ३२
धन्योहंमत्समोनान्योदृष्टंचैवतुमिश्रितं ॥ प्रहर्षंचपरंजग्मुःसकलास्तस्यबांधवाः ३३ कृत्वाप्रदक्षि
णंतीर्थंस्नानंकृत्वाविधानतः ॥ हरिदत्तश्चैवसंस्नातस्तस्मिंस्तीर्थेचमिश्रिते ३४ हरिणाप्रेषितंचैवं
विमानंचोत्तमंशुभं ॥ आगतंचविमानंचहरिदत्तोयत्रसंस्थितः ३५ विष्णुदूतैश्चसंप्रोक्तोहरिदत्तस्त
त्रपार्वति ॥ हरिदत्तमहाप्राज्ञयानमारुह्यवैष्णवं ३६ पदंगच्छततोदेवहरिदत्तोवचनमब्रवीत् ॥ यदा
मत्पितरौचैवबांधवैश्चसमन्वितः ३७ गंतारश्चयदादूतातदागंताह्यहंपदं ॥ इत्येवंवाक्यमाकर्ण्य
विष्णोश्चैवतुपार्षदाः ३८ विमानैरर्कसंकाशैरारुह्यतस्यबांधवान् ॥ पितरौवाहनैःसार्द्धंभृत्यैश्चैवा ५०

Digitized by Google

न्वितैस्तथा ३९ भासमानश्चतेजोभिर्य्युस्तेवैष्णवंपदं ॥ एतत्तेकथितंदेविमाहात्म्यंमिश्रितस्यच ४० अनूपमंमनोहारिसर्वेषांमुक्तिदंनृणां ॥ पठेद्वापाठयेद्वापिसर्वपापैःप्रमुच्यते ४१ ॥ इतिश्रीस्कन्दपुराणेउमामहेश्वरसंवादेमिश्रितमाहात्म्येद्वादशोऽध्यायः ॥ १२ ॥ * * * * *

इतिमिश्रितमाहात्म्यंसम्पूर्णम् ॥

Digitized by Google

इतिमिश्रितमाहात्म्यंसम्पूर्णम् ॥

Digitized by Google

Digitized by Google

Digitized by Google

Digitized by Google